॥ देवी माहात्म्यम् ॥

Devī Māhātmyam

॥ श्रीदुर्गायै नमः ॥

|| śrīdurgāyai namaḥ ||

॥ अथ श्रीदुर्गासप्तशती ॥

|| atha śrīdurgāsaptaśatī ||

प्रथमोऽध्यायः

prathamo'dhyāyaḥ

विनियोगः

viniyogaḥ

अस्य श्री प्रथमचरित्रस्य। ब्रह्मा ऋषिः। महाकाली

asya śrī prathamacaritrasya | brahmā ṛṣiḥ | mahākālī

देवता । गायत्री छन्दः । नन्दा शक्तिः । रक्तदन्तिका

devatā | gāyatrī chandaḥ | nandā śaktiḥ | raktadantikā

बीजम् । अग्निस्तत्त्वम् । ऋग्वेदः स्वरूपम् ।

bījam | agnistattvam | ṛgvedaḥ svarūpam |

श्रीमहाकालीप्रीत्यर्थे प्रथमचरित्रजपे विनियोगः ।

śrīmahākālīprītyarthe prathamacaritrajape viniyogaḥ |

। ध्यानम् ।

| dhyānam |

ॐ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः

om khaḍgaṁ cakragadeṣucāpaparighāñchūlaṁ bhuśuṇḍīṁ śiraḥ

शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।

śaṅkhaṁ sandadhatīṁ karaistrinayanāṁ sarvāṅgabhūṣāvṛtām |

नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां

nīlāśmadyutimāsyapādadaśakāṁ seve mahākālikāṁ

यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कौटभम् ॥

yāmastautsvapite harau kamalajo hantuṁ madhuṁ kauṭabham ||

ॐ नमश्चण्डिकायै ॥

om namaścaṇḍikāyai ||

ॐ ऐं मार्कण्डेय उवाच ॥ १ ॥

om aiṁ mārkaṇḍeya uvāca || 1||

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।

sāvarṇiḥ sūryatanayo yo manuḥ kathyate'ṣṭamaḥ |

निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ २ ॥

niśāmaya tadutpattiṁ vistarādgadato mama || 2||

महामायानुभावेन यथा मन्वन्तराधिपः ।

mahāmāyānubhāvena yathā manvantarādhipaḥ |

स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ ३ ॥

sa babhūva mahābhāgaḥ sāvarṇistanayo raveḥ || 3||

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।

svārociṣe'ntare pūrvaṁ caitravaṁśasamudbhavaḥ |

सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥ ४ ॥

suratho nāma rājābhūtsamaste kṣitimaṇḍale || 4||

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।

tasya pālayataḥ samyak prajāḥ putrānivaurasān |

बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ५ ॥

babhūvuḥ śatravo bhūpāḥ kolāvidhvaṁsinastadā || 5||

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ।

tasya tairabhavad yuddhamatiprabaladaṇḍinaḥ |

न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ६ ॥

nyūnairapi sa tairyuddhe kolāvidhvaṁsibhirjitaḥ || 6||

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।

tataḥ svapuramāyāto nijadeśādhipo'bhavat |

आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥ ७ ॥

ākrāntaḥ sa mahābhāgastaistadā prabalāribhiḥ || 7||

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।

amātyairbalibhirduṣṭairdurbalasya durātmabhiḥ |

कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ८ ॥

kośo balaṁ cāpahṛtaṁ tatrāpi svapure tataḥ || 8||

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।

tato mṛgayāvyājena hṛtasvāmyaḥ sa bhūpatiḥ |

एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥

ekākī hayamāruhya jagāma gahanaṁ vanam || 9||

स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ।

sa tatrāśramamadrākṣīddvijavaryasya medhasaḥ |

प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ १० ॥

praśāntaśvāpadākīrṇaṁ muniśiṣyopaśobhitam || 10||

तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ।

tasthau kaṁcitsa kālaṁ ca muninā tena satkṛtaḥ I

इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥ ११ ॥

itaścetaśca vicaraṁstasmin munivarāśrame II 11II

सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः ।

so'cintayattadā tatra mamatvākṛṣṭamānasaḥ I

मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥ १२ ॥

matpūrvaiḥ pālitaṁ pūrvaṁ mayā hīnaṁ puraṁ hi tat II 12II

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ।

madbhṛtyaistairasadvṛttairdharmataḥ pālyate na vā I

न जाने स प्रधानो मे शूरो हस्ती सदामदः ॥ १३ ॥

na jāne sa pradhāno me śūro hastī sadāmadaḥ II 13II

मम वैरिवशं यातः कान् भोगानुपलप्स्यते ।

mama vairivaśaṁ yātaḥ kān bhogānupalapsyate I

ये ममानुगता नित्यं प्रसादधनभोजनैः ॥ १४ ॥

ye mamānugatā nityaṁ prasādadhanabhojanaiḥ II 14II

अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ।

anuvṛttiṁ dhruvaṁ te'dya kurvantyanyamahībhṛtām I

असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥ १५ ॥

asamyagvyayaśīlaistaiḥ kurvadbhiḥ satataṁ vyayam II 15II

संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ।

sañcitaḥ so'tiduḥkhena kṣayaṁ kośo gamiṣyati |

एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ॥ १६ ॥

etaccānyacca satataṁ cintayāmāsa pārthivaḥ || 16||

तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ।

tatra viprāśramābhyāśe vaiśyamekaṁ dadarśa saḥ |

स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥ १७ ॥

sa pṛṣṭastena kastvaṁ bho hetuścāgamane'tra kaḥ || 17||

सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ।

saśoka iva kasmāttvaṁ durmanā iva lakṣyase |

इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ १८ ॥

ityākarṇya vacastasya bhūpateḥ praṇayoditam || 18||

प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥

pratyuvāca sa taṁ vaiśyaḥ praśrayāvanato nṛpam || 19||

वैश्य उवाच ॥ २० ॥

vaiśya uvāca || 20||

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ २१ ॥

samādhirnāma vaiśyo'hamutpanno dhanināṁ kule || 21||

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ।

putradārairnirastaśca dhanalobhādasādhubhiḥ ।

विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥ २२ ॥

vihīnaśca dhanairdāraiḥ putrairādāya me dhanam ।। 22।।

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ।

vanamabhyāgato duḥkhī nirastaścāptabandhubhiḥ ।

सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥ २३ ॥

so'haṁ na vedmi putrāṇāṁ kuśalākuśalātmikām ।। 23।।

प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ।

pravṛttiṁ svajanānāṁ ca dārāṇāṁ cātra saṁsthitaḥ ।

किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम् ॥ २४ ॥

kiṁ nu teṣāṁ gṛhe kṣemamakṣemaṁ kiṁ nu sāmpratam ।। 24।।

कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥ २५ ॥

kathaṁ te kiṁ nu sadvṛttā durvṛttāḥ kiṁ nu me sutāḥ ।। 25।।

राजोवाच ॥ २६ ॥

rājovāca ।। 26।।

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥

yairnirasto bhavām̐llubdhaiḥ putradārādibhirdhanaiḥ ।। 27।।

तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ २८ ॥

teṣu kiṁ bhavataḥ snehamanubadhnāti mānasam || 28||

वैश्य उवाच ॥ २९ ॥

vaiśya uvāca || 29||

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ ३० ॥

evametadyathā prāha bhavānasmadgataṁ vacaḥ || 30||

किं करोमि न बध्नाति मम निष्ठुरतां मनः ।

kiṁ karomi na badhnāti mama niṣṭhuratāṁ manaḥ |

यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥ ३१ ॥

yaiḥ santyajya pitṛsnehaṁ dhanalubdhairnirākṛtaḥ || 31||

पतिस्वजनहार्दं च हार्दितेष्वेव मे मनः ।

patisvajanahārdaṁ ca hārditeṣveva me manaḥ |

किमेतन्नाभिजानामि जानन्नपि महामते ॥ ३२ ॥

kimetannābhijānāmi jānannapi mahāmate || 32||

यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ।

yatpremapravaṇaṁ cittaṁ viguṇeṣvapi bandhuṣu |

तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥ ३३ ॥

teṣāṁ kṛte me niḥśvāso daurmanasyaṁ ca jāyate || 33||

करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३४ ॥

karomi kiṁ yanna manasteṣvaprītiṣu niṣṭhuram || 34||

मार्कण्डेय उवाच ॥ ३५ ॥

mārkaṇḍeya uvāca || 35||

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥

tatastau sahitau vipra taṁ muniṁ samupasthitau || 36||

समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ।

samādhirnāma vaiśyo'sau sa ca pārthivasattamaḥ |

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ ३७ ॥

kṛtvā tu tau yathānyāyaṁ yathārhaṁ tena saṁvidam || 37||

उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥

upaviṣṭau kathāḥ kāściccakraturvaiśyapārthivau || 38||

राजोवाच ॥ ३९ ॥

rājovāca || 39||

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ४० ॥

bhagavaṁstvāmahaṁ praṣṭumicchāmyekaṁ vadasva tat || 40||

दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ।
duḥkhāya yanme manasaḥ svacittāyattatāṁ vinā ।
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥ ४१ ॥
mamatvaṁ gatarājyasya rājyāṅgeṣvakhileṣvapi || 41||

जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ।
jānato'pi yathājñasya kimetanmunisattama ।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ ४२ ॥
ayaṁ ca nikṛtaḥ putrairdārairbhṛtyaistathojjhitaḥ || 42||

स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ।
svajanena ca santyaktasteṣu hārdī tathāpyati ।
एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ॥ ४३ ॥
evameṣa tathāhaṁ ca dvāvapyatyantaduḥkhitau || 43||

दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ।
dṛṣṭadoṣe'pi viṣaye mamatvākṛṣṭamānasau ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ४४ ॥
tatkimetanmahābhāga yanmoho jñāninorapi || 44||

ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥ ४५ ॥
mamāsya ca bhavatyeṣā vivekāndhasya mūḍhatā || 45||

ऋषिरुवाच ॥ ४६ ॥

ṛṣiruvāca || 46||

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥ ४७ ॥

jñānamasti samastasya jantorviṣayagocare || 47||

विषयाश्च महाभाग यान्ति चैवं पृथक्पृथक् ।

viṣayāśca mahābhāga yānti caivaṁ pṛthakpṛthak |

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ॥ ४८ ॥

divāndhāḥ prāṇinaḥ kecidrātrāvandhāstathāpare || 48||

केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ।

keciddivā tathā rātrau prāṇinastulyadṛṣṭayaḥ |

ज्ञानिनो मनुजाः सत्यं किं तु ते न हि केवलम् ॥ ४९ ॥

jñānino manujāḥ satyaṁ kiṁ tu te na hi kevalam || 49||

यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ।

yato hi jñāninaḥ sarve paśupakṣimṛgādayaḥ |

ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥ ५० ॥

jñānaṁ ca tanmanuṣyāṇāṁ yatteṣāṁ mṛgapakṣiṇām || 50||

मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ।

manuṣyāṇāṁ ca yatteṣāṁ tulyamanyattathobhayoḥ |

ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ॥ ५१ ॥

jñāne'pi sati paśyaitān pataṅgāñchāvacañcuṣu || 51||

कणमोक्षादृतान् मोहात्पीड्यमानानपि क्षुधा ।

kaṇamokṣādṛtān mohātpīḍyamānānapi kṣudhā ।

मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ॥ ५२ ॥

mānuṣā manujavyāghra sābhilāṣāḥ sutān prati ।। 52।।

लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि ।

lobhāt pratyupakārāya nanvetān kiṁ na paśyasi ।

तथापि ममतावर्त्ते मोहगर्ते निपातिताः ॥ ५३ ॥

tathāpi mamatāvartte mohagarte nipātitāḥ ।। 53।।

महामायाप्रभावेण संसारस्थितिकारिणा ।

mahāmāyāprabhāveṇa saṁsārasthitikāriṇā ।

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥ ५४ ॥

tannātra vismayaḥ kāryo yoganidrā jagatpateḥ ।। 54।।

महामाया हरेश्चैषा तया सम्मोह्यते जगत् ।

mahāmāyā hareścaiṣā tayā sammohyate jagat ।

ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ ५५ ॥

jñānināmapi cetāṁsi devī bhagavatī hi sā ।। 55।।

बलादाकृष्य मोहाय महामाया प्रयच्छति ।

balādākṛṣya mohāya mahāmāyā prayacchati ।

तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ ५६ ॥

tayā visṛjyate viśvaṁ jagadetaccarācaram ।। 56।।

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।

saiṣā prasannā varadā nṛṇāṁ bhavati muktaye |

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ ५७ ॥

sā vidyā paramā mukterhetubhūtā sanātanī || 57||

संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥

saṁsārabandhahetuśca saiva sarveśvareśvarī || 58||

राजोवाच ॥ ५९ ॥

rājovāca || 59||

भगवन् का हि सा देवी महामायेति यां भवान् ॥ ६० ॥

bhagavan kā hi sā devī mahāmāyeti yāṁ bhavān || 60||

ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।

bravīti kathamutpannā sā karmāsyāśca kiṁ dvija |

यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥

yatprabhāvā ca sā devī yatsvarūpā yadudbhavā || 61||

तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ६२ ॥

tatsarvaṁ śrotumicchāmi tvatto brahmavidāṁ vara || 62||

ऋषिरुवाच ॥ ६३ ॥

ṛṣiruvāca || 63||

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ ६४ ॥

nityaiva sā jaganmūrtistayā sarvamidaṁ tatam || 64||

तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।

tathāpi tatsamutpattirbahudhā śrūyatāṁ mama |

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ६५ ॥

devānāṁ kāryasiddhyarthamāvirbhavati sā yadā || 65||

उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ।

utpanneti tadā loke sā nityāpyabhidhīyate |

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ ६६ ॥

yoganidrāṁ yadā viṣṇurjagatyekārṇavīkṛte || 66||

आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ।

āstīrya śeṣamabhajat kalpānte bhagavān prabhuḥ |

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥

tadā dvāvasurau ghorau vikhyātau madhukaiṭabhau || 67||

विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ।

viṣṇukarṇamalodbhūtau hantuṁ brahmāṇamudyatau |

स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ ६८ ॥

sa nābhikamale viṣṇoḥ sthito brahmā prajāpatiḥ || 68||

दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ।

dṛṣṭvā tāvasurau cograu prasuptaṁ ca janārdanam ।

तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः ॥ ६९ ॥

tuṣṭāva yoganidrāṁ tāmekāgrahṛdayaḥ sthitaḥ ।। 69।।

विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।

vibodhanārthāya harerharinetrakṛtālayām ।

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ ७० ॥

viśveśvarīṁ jagaddhātrīṁ sthitisaṁhārakāriṇīm ।। 70।।

निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ७१ ॥

nidrāṁ bhagavatīṁ viṣṇoratulāṁ tejasaḥ prabhuḥ ।। 71।।

ब्रह्मोवाच ॥ ७२ ॥

brahmovāca ।। 72।।

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ ७३ ॥

tvaṁ svāhā tvaṁ svadhā tvaṁ hi vaṣaṭkāraḥ svarātmikā ।। 73।।

सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ।

sudhā tvamakṣare nitye tridhā mātrātmikā sthitā ।

अर्धमात्रा स्थिता नित्या यानुच्चार्याविशेषतः ॥ ७४ ॥

ardhamātrā sthitā nityā yānuccāryāviśeṣataḥ ।। 74।।

त्वमेव संध्या सावित्री त्वं देवि जननी परा ।

tvameva sandhyā sāvitrī tvaṁ devi jananī parā |

त्वयैतद्धार्यते विश्वं त्वयैतत् सृज्यते जगत् ॥ ७५ ॥

tvayaitaddhāryate viśvaṁ tvayaitat sṛjyate jagat || 75||

त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ।

tvayaitat pālyate devi tvamatsyante ca sarvadā |

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ ७६ ॥

visṛṣṭau sṛṣṭirūpā tvaṁ sthitirūpā ca pālane || 76||

तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ।

tathā saṁhṛtirūpānte jagato'sya jaganmaye |

महाविद्या महामाया महामेधा महास्मृतिः ॥ ७७ ॥

mahāvidyā mahāmāyā mahāmedhā mahāsmṛtiḥ || 77||

महामोहा च भवती महादेवी महेश्वरी ।

mahāmohā ca bhavatī mahādevī maheśvarī |

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ ७८ ॥

prakṛtistvaṁ ca sarvasya guṇatrayavibhāvinī || 78||

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।

kālarātrirmahārātrirmoharātriśca dāruṇā |

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ ७९ ॥

tvaṁ śrīstvamīśvarī tvaṁ hrīstvaṁ buddhirbodhalakṣaṇā || 79||

लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ।

lajjā puṣṭistathā tuṣṭistvaṁ śāntiḥ kṣāntireva ca |

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ ८० ॥

khaḍginī śūlinī ghorā gadinī cakriṇī tathā || 80||

शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ।

śaṅkhinī cāpinī bāṇabhuśuṇḍīparighāyudhā |

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ ८१ ॥

saumyā saumyatarāśeṣasaumyebhyastvatisundarī || 81||

परापराणां परमा त्वमेव परमेश्वरी ।

parāparāṇāṁ paramā tvameva parameśvarī |

यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ ८२ ॥

yacca kiñcitkvacidvastu sadasadvākhilātmike || 82||

तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ।

tasya sarvasya yā śaktiḥ sā tvaṁ kiṁ stūyase mayā |

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ ८३ ॥

yayā tvayā jagatsraṣṭā jagatpātyatti yo jagat || 83||

सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ।

so'pi nidrāvaśaṁ nītaḥ kastvāṁ stotumiheśvaraḥ |

विष्णुः शरीरग्रहणमहमीशान एव च ॥ ८४ ॥

viṣṇuḥ śarīragrahaṇamahamīśāna eva ca || 84||

कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ।

kāritāste yato'tastvāṁ kaḥ stotuṁ śaktimān bhavet |

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ ८५ ॥

sā tvamitthaṁ prabhāvaiḥ svairudārairdevi saṁstutā || 85||

मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ।

mohayaitau durādharṣāvasurau madhukaiṭabhau |

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ ८६ ॥

prabodhaṁ ca jagatsvāmī nīyatāmacyuto laghu || 86||

बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ ८७ ॥

bodhaśca kriyatāmasya hantumetau mahāsurau || 87||

ऋषिरुवाच ॥ ८८ ॥

ṛṣiruvāca || 88||

एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ ८९ ॥

evaṁ stutā tadā devī tāmasī tatra vedhasā || 89||

विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ।

viṣṇoḥ prabodhanārthāya nihantuṁ madhukaiṭabhau |

नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ ९० ॥

netrāsyanāsikābāhuhṛdayebhyastathorasaḥ || 90||

निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ।

nirgamya darśane tasthau brahmaṇo'vyaktajanmanaḥ ।

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ ९१ ॥

uttasthau ca jagannāthastayā mukto janārdanaḥ ।। 91।।

एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ।

ekārṇave'hiśayanāttataḥ sa dadṛśe ca tau ।

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ ९२ ॥

madhukaiṭabhau durātmānāvativīryaparākramau ।। 92।।

क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ।

krodharaktekṣaṇāvattuṁ brahmāṇaṁ janitodyamau ।

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥ ९३ ॥

samutthāya tatastābhyāṁ yuyudhe bhagavān hariḥ ।। 93।।

पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ।

pañcavarṣasahasrāṇi bāhupraharaṇo vibhuḥ ।

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ ९४ ॥

tāvapyatibalonmattau mahāmāyāvimohitau ।। 94।।

उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥

uktavantau varo'smatto vriyatāmiti keśavam ।। 95।।

श्रीभगवानुवाच ॥ ९६ ॥

śrībhagavānuvāca || 96||

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ ९७ ॥

bhavetāmadya me tuṣṭau mama vadhyāvubhāvapi || 97||

किमन्येन वरेणात्र एतावद्धि वृतं मया ॥ ९८ ॥

kimanyena vareṇātra etāvaddhi vṛtaṁ mayā || 98||

ऋषिरुवाच ॥ ९९ ॥

ṛṣiruvāca || 99||

वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ १०० ॥

vañcitābhyāmiti tadā sarvamāpomayaṁ jagat || 100||

विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ।

vilokya tābhyāṁ gadito bhagavān kamalekṣaṇaḥ |

आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ १०१ ॥

āvāṁ jahi na yatrorvī salilena pariplutā || 101||

ऋषिरुवाच ॥ १०२ ॥

ṛṣiruvāca || 102||

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।

tathetyuktvā bhagavatā śaṅkhacakragadābhṛtā |

कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥ १०३ ॥

kṛtvā cakreṇa vai chinne jaghane śirasī tayoḥ || 103||

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।

evameṣā samutpannā brahmaṇā saṁstutā svayam |

प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ १०४ ॥

prabhāvamasyā devyāstu bhūyaḥ śṛṇu vadāmi te || 104||

। ऐं ॐ ।

| aim om |

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये मधुकैटभवधो नाम

devīmāhātmye madhukaiṭabhavadho nāma

प्रथमोऽध्यायः ॥ १ ॥

prathamo'dhyāyaḥ || 1||

द्वितीयोऽध्यायः

dvitīyo'dhyāyaḥ

विनियोगः

viniyogaḥ

अस्य श्री मध्यमचरित्रस्य विष्णुर्ऋषिः।

asya śrī madhyamacaritrasya viṣṇurṛṣiḥ |

श्रीमहालक्ष्मीर्देवता। उष्णिक् छन्दः। शाकम्भरी शक्तिः।

śrīmahālakṣmīrdevatā | uṣṇik chandaḥ | śākambharī śaktiḥ |

दुर्गा बीजम्। वायुस्तत्त्वम्। यजुर्वेदः स्वरूपम्।

durgā bījam | vāyustattvam | yajurvedaḥ svarūpam |

श्रीमहालक्ष्मीप्रीत्यर्थे मध्यमचरित्रजपे विनियोगः।

śrīmahālakṣmīprītyarthe madhyamacaritrajape viniyogaḥ |

। ध्यानम्।

| dhyānam |

अक्षस्त्रक्परशू गदेषुकुलिशं पद्मं धनुः कुण्डिकां

akṣasrakparaśū gadeṣukuliśaṁ padmaṁ dhanuḥ kuṇḍikāṁ

दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
daṇḍaṁ śaktimasiṁ ca carma jalajaṁ ghaṇṭāṁ surābhājanam |
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
śūlaṁ pāśasudarśane ca dadhatīṁ hastaiḥ pravālaprabhāṁ
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥
seve sairibhamardinīmiha mahālakṣmīṁ sarojasthitām ||

ॐ ह्रीं ऋृषिरुवाच ॥ १ ॥
om hrīm ṛṣiruvāca || 1||

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ।
devāsuramabhūdyuddhaṁ pūrṇamabdaśataṁ purā |
महिषेऽसुराणामधिपे देवानां च पुरन्दरे ॥ २ ॥
mahiṣe'surāṇāmadhipe devānāṁ ca purandare || 2||

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।
tatrāsurairmahāvīryairdevasainyaṁ parājitam |
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥ ३ ॥
jitvā ca sakalān devānindro'bhūnmahiṣāsuraḥ || 3||

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
tataḥ parājitā devāḥ padmayoniṁ prajāpatim |
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥
puraskṛtya gatāstatra yatreśagaruḍadhvajau || 4||

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।

yathāvṛttaṁ tayostadvanmahiṣāsuraceṣṭitam |

त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥

tridaśāḥ kathayāmāsurdevābhibhavavistaram || 5||

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।

sūryendrāgnyanilendūnāṁ yamasya varuṇasya ca |

अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ॥ ६ ॥

anyeṣāṁ cādhikārānsa svayamevādhitiṣṭhati || 6||

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।

svargānnirākṛtāḥ sarve tena devagaṇā bhuvi |

विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥ ७ ॥

vicaranti yathā martyā mahiṣeṇa durātmanā || 7||

एतद्वः कथितं सर्वममरारिविचेष्टितम् ।

etadvaḥ kathitaṁ sarvamamarāriviceṣṭitam |

शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥ ८ ॥

śaraṇaṁ vaḥ prapannāḥ smo vadhastasya vicintyatām || 8||

इत्थं निशम्य देवानां वचांसि मधुसूदनः ।

itthaṁ niśamya devānāṁ vacāṁsi madhusūdanaḥ |

चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥ ९ ॥

cakāra kopaṁ śambhuśca bhrukuṭīkuṭilānanau || 9||

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।

tato'tikopapūrṇasya cakriṇo vadanāttataḥ ।

निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥ १० ॥

niścakrāma mahattejo brahmaṇaḥ śaṅkarasya ca ।। 10।।

अन्येषां चैव देवानां शक्रादीनां शरीरतः ।

anyeṣāṁ caiva devānāṁ śakrādīnāṁ śarīrataḥ ।

निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ ११ ॥

nirgataṁ sumahattejastaccaikyaṁ samagacchata ।। 11।।

अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ।

atīva tejasaḥ kūṭaṁ jvalantamiva parvatam ।

ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥ १२ ॥

dadṛśuste surāstatra jvālāvyāptadigantaram ।। 12।।

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ।

atulaṁ tatra tattejaḥ sarvadevaśarīrajam ।

एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १३ ॥

ekasthaṁ tadabhūnnārī vyāptalokatrayaṁ tviṣā ।। 13।।

यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ।

yadabhūcchāmbhavaṁ tejastenājāyata tanmukham ।

याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥ १४ ॥

yāmyena cābhavan keśā bāhavo viṣṇutejasā ।। 14।।

सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत्।

saumyena stanayoryugmaṁ madhyaṁ caindreṇa cābhavat ।

वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः॥ १५॥

vāruṇena ca jaṅghorū nitambastejasā bhuvaḥ ।। 15।।

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा।

brahmaṇastejasā pādau tadaṅgulyo'rkatejasā ।

वसूनां च कराङ्गुल्यः कौबेरेण च नासिका॥ १६॥

vasūnāṁ ca karāṅgulyaḥ kaubereṇa ca nāsikā ।। 16।।

तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा।

tasyāstu dantāḥ sambhūtāḥ prājāpatyena tejasā ।

नयनत्रितयं जज्ञे तथा पावकतेजसा॥ १७॥

nayanatritayaṁ jajñe tathā pāvakatejasā ।। 17।।

भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च।

bhruvau ca sandhyayostejaḥ śravaṇāvanilasya ca ।

अन्येषां चैव देवानां सम्भवस्तेजसां शिवा॥ १८॥

anyeṣāṁ caiva devānāṁ sambhavastejasāṁ śivā ।। 18।।

ततः समस्तदेवानां तेजोराशिसमुद्भवाम्।

tataḥ samastadevānāṁ tejorāśisamudbhavām ।

तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः।

tāṁ vilokya mudaṁ prāpuramarā mahiṣārditāḥ ।

ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ॥ १९ ॥

tato devā dadustasyai svāni svānyāyudhāni ca || 19||

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ।

śūlaṁ śūlādviniṣkṛṣya dadau tasyai pinākadhṛk |

चक्रं च दत्तवान् कृष्णः समुत्पाट्य स्वचक्रतः ॥ २० ॥

cakraṁ ca dattavān kṛṣṇaḥ samutpāṭya svacakrataḥ || 20||

शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।

śaṅkhaṁ ca varuṇaḥ śaktiṁ dadau tasyai hutāśanaḥ |

मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ २१ ॥

māruto dattavāṁścāpaṁ bāṇapūrṇe tatheṣudhī || 21||

वज्रमिन्द्रः समुत्पाट्य कुलिशादमराधिपः ।

vajramindraḥ samutpāṭya kuliśādamarādhipaḥ |

ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥ २२ ॥

dadau tasyai sahasrākṣo ghaṇṭāmairāvatādgajāt || 22||

कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।

kāladaṇḍādyamo daṇḍaṁ pāśaṁ cāmbupatirdadau |

प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥ २३ ॥

prajāpatiścākṣamālāṁ dadau brahmā kamaṇḍalum || 23||

समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ।

samastaromakūpeṣu nijaraśmīn divākaraḥ |

कालश्च दत्तवान् खड्गं तस्यै चर्म च निर्मलम् ॥ २४ ॥

kālaśca dattavān khaḍgaṁ tasyai carma ca nirmalam || 24||

क्षीरोदश्चामलं हारमजरे च तथाम्बरे ।

kṣīrodaścāmalaṁ hāramajare ca tathāmbare |

चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥ २५ ॥

cūḍāmaṇiṁ tathā divyaṁ kuṇḍale kaṭakāni ca || 25||

अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ।

ardhacandraṁ tathā śubhraṁ keyūrān sarvabāhuṣu |

नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥ २६ ॥

nūpurau vimalau tadvad graiveyakamanuttamam || 26||

अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ।

aṅgulīyakaratnāni samastāsvaṅgulīṣu ca |

विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥ २७ ॥

viśvakarmā dadau tasyai paraśuṁ cātinirmalam || 27||

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ।

astrāṇyanekarūpāṇi tathābhedyaṁ ca daṁśanam |

अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ॥ २८ ॥

amlānapaṅkajāṁ mālāṁ śirasyurasi cāparām || 28||

अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ।

adadajjaladhistasyai paṅkajaṁ cātiśobhanam |

हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥ २९ ॥

himavān vāhanaṁ siṁhaṁ ratnāni vividhāni ca || 29||

ददावशून्यं सुरया पानपात्रं धनाधिपः ।

dadāvaśūnyaṁ surayā pānapātraṁ dhanādhipaḥ |

शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ ३० ॥

śeṣaśca sarvanāgeśo mahāmaṇivibhūṣitam || 30||

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।

nāgahāraṁ dadau tasyai dhatte yaḥ pṛthivīmimām |

अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३१ ॥

anyairapi surairdevī bhūṣaṇairāyudhaistathā || 31||

सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।

sammānitā nanādoccaiḥ sāṭṭahāsaṁ muhurmuhuḥ |

तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३२ ॥

tasyā nādena ghoreṇa kṛtsnamāpūritaṁ nabhaḥ || 32||

अमायतातिमहता प्रतिशब्दो महानभूत् ।

amāyatātimahatā pratiśabdo mahānabhūt |

चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३३ ॥

cukṣubhuḥ sakalā lokāḥ samudrāśca cakampire || 33||

चचाल वसुधा चेलुः सकलाश्च महीधराः ।
cacāla vasudhā celuḥ sakalāśca mahīdharāḥ ।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ॥ ३४ ॥
jayeti devāśca mudā tāmūcuḥ siṁhavāhinīm ।। 34।।

तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ।
tuṣṭuvurmunayaścaināṁ bhaktinamrātmamūrtayaḥ ।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५ ॥
dṛṣṭvā samastaṁ saṅkṣubdhaṁ trailokyamamarārayaḥ ।। 35।।

सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ।
sannaddhākhilasainyāste samuttasthurudāyudhāḥ ।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥
āḥ kimetaditi krodhādābhāṣya mahiṣāsuraḥ ।। 36।।

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।
abhyadhāvata taṁ śabdamaśeṣairasurairvṛtaḥ ।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥ ३७ ॥
sa dadarśa tato devīṁ vyāptalokatrayāṁ tviṣā ।। 37।।

पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
pādākrāntyā natabhuvaṁ kirīṭollikhitāmbarām ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ ३८ ॥
kṣobhitāśeṣapātālāṁ dhanurjyāniḥsvanena tām ।। 38।।

दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ।

diśo bhujasahasreṇa samantādvyāpya saṁsthitām ।

ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ३९ ॥

tataḥ pravavṛte yuddhaṁ tayā devyā suradviṣām ।। 39।।

शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ।

śastrāstrairbahudhā muktairādīpitadigantaram ।

महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ४० ॥

mahiṣāsurasenānīścikṣurākhyo mahāsuraḥ ।। 40।।

युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ।

yuyudhe cāmaraścānyaiścaturaṅgabalānvitaḥ ।

रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४१ ॥

rathānāmayutaiḥ ṣaḍbhirudagrākhyo mahāsuraḥ ।। 41।।

अयुध्यतायुतानां च सहस्रेण महाहनुः ।

ayudhyatāyutānāṁ ca sahasreṇa mahāhanuḥ ।

पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ ४२ ॥

pañcāśadbhiśca niyutairasilomā mahāsuraḥ ।। 42।।

अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ।

ayutānāṁ śataiḥ ṣaḍbhirbāṣkalo yuyudhe raṇe ।

गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ ४३ ॥

gajavājisahasraughairanekaiḥ parivāritaḥ ।। 43।।

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।

vṛto rathānāṁ koṭyā ca yuddhe tasminnayudhyata |

बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ॥ ४४ ॥

biḍālākhyo'yutānāṁ ca pañcāśadbhirathāyutaiḥ || 44||

युयुधे संयुगे तत्र रथानां परिवारितः ।

yuyudhe saṁyuge tatra rathānāṁ parivāritaḥ |

अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ ४५ ॥

anye ca tatrāyutaśo rathanāgahayairvṛtāḥ || 45||

युयुधुः संयुगे देव्या सह तत्र महासुराः ।

yuyudhuḥ saṁyuge devyā saha tatra mahāsurāḥ |

कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥ ४६ ॥

koṭikoṭisahasraistu rathānāṁ dantināṁ tathā || 46||

हयानां च वृतो युद्धे तत्राभून्महिषासुरः ।

hayānāṁ ca vṛto yuddhe tatrābhūnmahiṣāsuraḥ |

तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ ४७ ॥

tomarairbhindipālaiśca śaktibhirmusalaistathā || 47||

युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ।

yuyudhuḥ saṁyuge devyā khaḍgaiḥ paraśupaṭṭiśaiḥ |

केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथापरे ॥ ४८ ॥

kecicca cikṣipuḥ śaktīḥ kecit pāśāṁstathāpare || 48||

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।

devīṁ khaḍgaprahāraistu te tāṁ hantuṁ pracakramuḥ |

सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ ४९ ॥

sāpi devī tatastāni śastrāṇyastrāṇi caṇḍikā || 49||

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ।

līlayaiva praciccheda nijaśastrāstravarṣiṇī |

अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ ५० ॥

anāyastānanā devī stūyamānā surarṣibhiḥ || 50||

मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।

mumocāsuradeheṣu śastrāṇyastrāṇi ceśvarī |

सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ५१ ॥

so'pi kruddho dhutasaṭo devyā vāhanakesarī || 51||

चचारासुरसैन्येषु वनेष्विव हुताशनः ।

cacārāsurasainyeṣu vaneṣviva hutāśanaḥ |

निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ ५२ ॥

niḥśvāsān mumuce yāṁśca yudhyamānā raṇe'mbikā || 52||

त एव सद्यः सम्भूता गणाः शतसहस्रशः ।

ta eva sadyaḥ sambhūtā gaṇāḥ śatasahasraśaḥ |

युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥ ५३ ॥

yuyudhuste paraśubhirbhindipālāsipaṭṭiśaiḥ || 53||

नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ।

nāśayanto'suragaṇān devīśaktyupabṛṁhitāḥ |

अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ॥ ५४ ॥

avādayanta paṭahān gaṇāḥ śaṅkhāṁstathāpare || 54||

मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ।

mṛdaṅgāṁśca tathaivānye tasmin yuddhamahotsave |

ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ ५५ ॥

tato devī triśūlena gadayā śaktivṛṣṭibhiḥ || 55||

खड्गादिभिश्च शतशो निजघान महासुरान् ।

khaḍgādibhiśca śataśo nijaghāna mahāsurān |

पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥ ५६ ॥

pātayāmāsa caivānyān ghaṇṭāsvanavimohitān || 56||

असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ।

asurān bhuvi pāśena baddhvā cānyānakarṣayat |

केचिद् द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ ५७ ॥

kecid dvidhākṛtāstīkṣṇaiḥ khaḍgapātaistathāpare || 57||

विपोथिता निपातेन गदया भुवि शेरते ।

vipothitā nipātena gadayā bhuvi śerate |

वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ ५८ ॥

vemuśca kecidrudhiraṁ musalena bhṛśaṁ hatāḥ || 58||

केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।

kecinnipatitā bhūmau bhinnāḥ śūlena vakṣasi |

निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥ ५९ ॥

nirantarāḥ śaraugheṇa kṛtāḥ kecidraṇājire || 59||

श्येनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः ।

śyenānukāriṇaḥ prāṇān mumucustridaśārdanāḥ |

केषांचिद् बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ ६० ॥

keṣāñcid bāhavaśchinnāśchinnagrīvāstathāpare || 60||

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।

śirāṁsi peturanyeṣāmanye madhye vidāritāḥ |

विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥ ६१ ॥

vicchinnajaṅghāstvapare petururvyāṁ mahāsurāḥ || 61||

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ।

ekabāhvakṣicaraṇāḥ keciddevyā dvidhākṛtāḥ |

छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२ ॥

chinne'pi cānye śirasi patitāḥ punarutthitāḥ || 62||

कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।

kabandhā yuyudhurdevyā gṛhītaparamāyudhāḥ |

ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥ ६३ ॥

nanṛtuścāpare tatra yuddhe tūryalayāśritāḥ || 63||

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
kabandhāśchinnaśirasaḥ khaḍgaśaktyṛṣṭipāṇayaḥ ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥ ६४ ॥
tiṣṭha tiṣṭheti bhāṣanto devīmanye mahāsurāḥ ।। 64।।

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।
pātitai rathanāgāśvairasuraiśca vasundharā ।
अगम्या साभवत्तत्र यत्राभूत् स महारणः ॥ ६५ ॥
agamyā sābhavattatra yatrābhūt sa mahāraṇaḥ ।। 65।।

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः ।
śoṇitaughā mahānadyaḥ sadyastatra prasusruvuḥ ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥
madhye cāsurasainyasya vāraṇāsuravājinām ।। 66।।

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ।
kṣaṇena tanmahāsainyamasurāṇāṁ tathāmbikā ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥ ६७ ॥
ninye kṣayaṁ yathā vahnistṛṇadārumahācayam ।। 67।।

स च सिंहो महानादमुत्सृजन् धुतकेसरः ।
sa ca siṁho mahānādamutsṛjan dhutakesaraḥ ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६८ ॥
śarīrebhyo'marārīṇāmasūniva vicinvati ।। 68।।

देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ।

devyā gaṇaiśca taistatra kṛtaṁ yuddhaṁ tathāsuraiḥ |

यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥

yathaiṣāṁ tutuṣurdevāḥ puṣpavṛṣṭimuco divi || 69||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये महिषासुरसैन्यवधो नाम

devīmāhātmye mahiṣāsurasainyavadho nāma

द्वितीयोऽध्यायः ॥ २ ॥

dvitīyo'dhyāyaḥ || 2||

तृतीयोऽध्यायः

tṛtīyo'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।

nihanyamānaṁ tatsainyamavalokya mahāsuraḥ |

सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥ २ ॥

senānīścikṣuraḥ kopādyayau yoddhumathāmbikām || 2||

स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।

sa devīṁ śaravarṣeṇa vavarṣa samare'suraḥ |

यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥ ३ ॥

yathā merugireḥ śṛṅgaṁ toyavarṣeṇa toyadaḥ || 3||

तस्य छित्वा ततो देवी लीलयैव शरोत्करान् ।

tasya chitvā tato devī līlayaiva śarotkarān |

जघान तुरगान्बाणैर्यन्तारं चैव वाजिनाम् ॥ ४ ॥

jaghāna turagānbāṇairyantāraṁ caiva vājinām || 4||

चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ।

ciccheda ca dhanuḥ sadyo dhvajaṁ cātisamucchṛtam |

विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ५ ॥

vivyādha caiva gātreṣu chinnadhanvānamāśugaiḥ || 5||

सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।

sacchinnadhanvā viratho hatāśvo hatasārathiḥ |

अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ६ ॥

abhyadhāvata tāṁ devīṁ khaḍgacarmadharo'suraḥ || 6||

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।

siṁhamāhatya khaḍgena tīkṣṇadhāreṇa mūrdhani |

आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ७ ॥

ājaghāna bhuje savye devīmapyativegavān || 7||

तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।

tasyāḥ khaḍgo bhujaṁ prāpya paphāla nṛpanandana |

ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥

tato jagrāha śūlaṁ sa kopādaruṇalocanaḥ || 8||

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।

cikṣepa ca tatastattu bhadrakālyāṁ mahāsuraḥ |

जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥ ९ ॥

jājvalyamānaṁ tejobhī ravibimbamivāmbarāt || 9||

दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।

dṛṣṭvā tadāpatacchūlaṁ devī śūlamamuñcata |

तेन तच्छतधा नीतं शूलं स च महासुरः ॥ १० ॥

tena tacchatadhā nītaṁ śūlaṁ sa ca mahāsuraḥ || 10||

हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ।

hate tasminmahāvīrye mahiṣasya camūpatau |

आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ ११ ॥

ājagāma gajārūḍhaścāmarastridaśārdanaḥ || 11||

सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ।

so'pi śaktiṁ mumocātha devyāstāmambikā drutam |

हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥

huṅkārābhihatāṁ bhūmau pātayāmāsa niṣprabhām || 12||

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ।

bhagnāṁ śaktiṁ nipatitāṁ dṛṣṭvā krodhasamanvitaḥ |

चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १३ ॥

cikṣepa cāmaraḥ śūlaṁ bāṇaistadapi sācchinat || 13||

ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ।

tataḥ siṁhaḥ samutpatya gajakumbhāntare sthitaḥ |

बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १४ ॥

bāhuyuddhena yuyudhe tenoccaistridaśāriṇā || 14||

युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ।

yudhyamānau tatastau tu tasmānnāgānmahīṁ gatau ǀ

युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १५ ॥

yuyudhāte'tisaṁrabdhau prahārairatidāruṇaiḥ ǀǀ 15ǀǀ

ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ।

tato vegāt khamutpatya nipatya ca mṛgāriṇā ǀ

करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥ १६ ॥

karaprahāreṇa śiraścāmarasya pṛthak kṛtam ǀǀ 16ǀǀ

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।

udagraśca raṇe devyā śilāvṛkṣādibhirhataḥ ǀ

दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥ १७ ॥

dantamuṣṭitalaiścaiva karālaśca nipātitaḥ ǀǀ 17ǀǀ

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ।

devī kruddhā gadāpātaiścūrṇayāmāsa coddhatam ǀ

बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥ १८ ॥

bāṣkalaṁ bhindipālena bāṇaistāmraṁ tathāndhakam ǀǀ 18ǀǀ

उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ।

ugrāsyamugravīryaṁ ca tathaiva ca mahāhanum ǀ

त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १९ ॥

trinetrā ca triśūlena jaghāna parameśvarī ǀǀ 19ǀǀ

बिडालस्यासिना कायात् पातयामास वै शिरः ।

biḍālasyāsinā kāyāt pātayāmāsa vai śiraḥ ।

दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ २० ॥

durdharaṁ durmukhaṁ cobhau śarairninye yamakṣayam ।। 20।।

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।

evaṁ saṅkṣīyamāṇe tu svasainye mahiṣāsuraḥ ।

माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥ २१ ॥

māhiṣeṇa svarūpeṇa trāsayāmāsa tān gaṇān ।। 21।।

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ।

kāṁścittuṇḍaprahāreṇa khurakṣepaistathāparān ।

लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान् ॥ २२ ॥

lāṅgūlatāḍitāṁścānyān śṛṅgābhyāṁ ca vidāritān ।। 22।।

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।

vegena kāṁścidaparānnādena bhramaṇena ca ।

निःश्वासपवनेनान्यान्पातयामास भूतले ॥ २३ ॥

niḥśvāsapavanenānyānpātayāmāsa bhūtale ।। 23।।

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।

nipātya pramathānīkamabhyadhāvata so'suraḥ ।

सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥

siṁhaṁ hantuṁ mahādevyāḥ kopaṁ cakre tato'mbikā ।। 24।।

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ।

so'pi kopānmahāvīryaḥ khurakṣuṇṇamahītalaḥ |

शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २५ ॥

śṛṅgābhyāṁ parvatānuccāṁścikṣepa ca nanāda ca || 25||

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।

vegabhramaṇavikṣuṇṇā mahī tasya vyaśīryata |

लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २६ ॥

lāṅgūlenāhataścābdhiḥ plāvayāmāsa sarvataḥ || 26||

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।

dhutaśṛṅgavibhinnāśca khaṇḍaṁ khaṇḍaṁ yayurghanāḥ |

श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २७ ॥

śvāsānilāstāḥ śataśo nipeturnabhaso'calāḥ || 27||

इति क्रोधसमाध्मातमापतन्तं महासुरम् ।

iti krodhasamādhmātamāpatantaṁ mahāsuram |

दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥ २८ ॥

dṛṣṭvā sā caṇḍikā kopaṁ tadvadhāya tadākarot || 28||

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।

sā kṣiptvā tasya vai pāśaṁ taṁ babandha mahāsuram |

तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९ ॥

tatyāja māhiṣaṁ rūpaṁ so'pi baddho mahāmṛdhe || 29||

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।

tataḥ siṁho'bhavatsadyo yāvattasyāmbikā śiraḥ |

छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥

chinatti tāvat puruṣaḥ khaḍgapāṇiradṛśyata || 30||

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।

tata evāśu puruṣaṁ devī ciccheda sāyakaiḥ |

तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ ३१ ॥

taṁ khaḍgacarmaṇā sārdhaṁ tataḥ so'bhūnmahāgajaḥ || 31||

करेण च महासिंहं तं चकर्ष जगर्ज च ।

kareṇa ca mahāsiṁhaṁ taṁ cakarṣa jagarja ca |

कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥ ३२ ॥

karṣatastu karaṁ devī khaḍgena nirakṛntata || 32||

ततो महासुरो भूयो माहिषं वपुरास्थितः ।

tato mahāsuro bhūyo māhiṣaṁ vapurāsthitaḥ |

तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३ ॥

tathaiva kṣobhayāmāsa trailokyaṁ sacarācaram || 33||

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।

tataḥ kruddhā jaganmātā caṇḍikā pānamuttamam |

पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥

papau punaḥ punaścaiva jahāsāruṇalocanā || 34||

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।

nanarda cāsuraḥ so'pi balavīryamadoddhataḥ |

विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३५ ॥

viṣāṇābhyāṁ ca cikṣepa caṇḍikāṁ prati bhūdharān || 35||

सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।

sā ca tānprahitāṁstena cūrṇayantī śarotkaraiḥ |

उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥ ३६ ॥

uvāca taṁ madoddhūtamukharāgākulākṣaram || 36||

देव्युवाच ॥ ३७ ॥

devyuvāca || 37||

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।

garja garja kṣaṇaṁ mūḍha madhu yāvatpibāmyaham |

मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥ ३८ ॥

mayā tvayi hate'traiva garjiṣyantyāśu devatāḥ || 38||

ऋषिरुवाच ॥ ३९ ॥

ṛṣiruvāca || 39||

एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ।

evamuktvā samutpatya sārūḍhā taṁ mahāsuram |

पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥ ४० ॥

pādenākramya kaṇṭhe ca śūlenainamatāḍayat || 40||

ततः सोऽपि पदाक्रान्तस्तया निजमुखात्तदा ।

tataḥ so'pi padākrāntastayā nijamukhāttadā |

अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः ॥ ४१ ॥

ardhaniṣkrānta evāsīddevyā vīryeṇa saṁvṛtaḥ || 41||

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।

ardhaniṣkrānta evāsau yudhyamāno mahāsuraḥ |

तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ४२ ॥

tayā mahāsinā devyā śiraśchittvā nipātitaḥ || 42||

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।

tato hāhākṛtaṁ sarvaṁ daityasainyaṁ nanāśa tat |

प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४३ ॥

praharṣaṁ ca paraṁ jagmuḥ sakalā devatāgaṇāḥ || 43||

तुष्टुवुस्तां सुरा देवीं सहदिव्यैर्महर्षिभिः ।

tuṣṭuvustāṁ surā devīṁ sahadivyairmaharṣibhiḥ |

जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥

jagurgandharvapatayo nanṛtuścāpsarogaṇāḥ || 44||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये महिषासुरवधो नाम

devīmāhātmye mahiṣāsuravadho nāma

तृतीयोऽध्यायः ॥ ३ ॥

tṛtīyo'dhyāyaḥ || 3||

चतुर्थोऽध्यायः

caturtho'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca ।। 1।।

शक्रादयः सुरगणा निहतेऽतिवीर्ये

śakrādayaḥ suragaṇā nihate'tivīrye

तस्मिन्दुरात्मनि सुरारिबले च देव्या ।

tasminduratmani surāribale ca devyā ।

तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा

tāṁ tuṣṭuvuḥ praṇatinamraśirodharāṁsā

वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥

vāgbhiḥ praharṣapulakodgamacārudehāḥ ।। 2।।

देव्या यया ततमिदं जगदात्मशक्त्या

devyā yayā tatamidaṁ jagadātmaśaktyā

निःशेषदेवगणशक्तिसमूहमूर्त्या ।

niḥśeṣadevagaṇaśaktisamūhamūrtyā ।

तामम्बिकामखिलदेवमहर्षिपूज्यां

tāmambikāmakhiladevamaharṣipūjyāṁ

भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ ३ ॥

bhaktyā natāḥ sma vidadhātu śubhāni sā naḥ || 3||

यस्याः प्रभावमतुलं भगवाननन्तो

yasyāḥ prabhāvamatulaṁ bhagavānananto

ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।

brahmā haraśca na hi vaktumalaṁ balaṁ ca |

सा चण्डिकाखिलजगत्परिपालनाय

sā caṇḍikākhilajagatparipālanāya

नाशाय चाशुभभयस्य मतिं करोतु ॥ ४ ॥

nāśāya cāśubhabhayasya matiṁ karotu || 4||

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः

yā śrīḥ svayaṁ sukṛtināṁ bhavaneṣvalakṣmīḥ

पापात्मनां कृतधियां हृदयेषु बुद्धिः ।

pāpātmanāṁ kṛtadhiyāṁ hṛdayeṣu buddhiḥ |

श्रद्धा सतां कुलजनप्रभवस्य लज्जा

śraddhā satāṁ kulajanaprabhavasya lajjā

तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५ ॥

tāṁ tvāṁ natāḥ sma paripālaya devi viśvam || 5||

किं वर्णयाम तव रूपमचिन्त्यमेतत्

kiṁ varṇayāma tava rūpamacintyametat

किंचातिवीर्यमसुरक्षयकारि भूरि ।

kiñcātivīryamasurakṣayakāri bhūri |

किं चाहवेषु चरितानि तवाति यानि

kiṁ cāhaveṣu caritāni tavāti yāni

सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥

sarveṣu devyasuradevagaṇādikeṣu || 6||

हेतुः समस्तजगतां त्रिगुणापि दोषै-

hetuḥ samastajagatāṁ triguṇāpi doṣai-

र्न ज्ञायसे हरिहरादिभिरप्यपारा ।

rna jñāyase hariharādibhirapyapārā |

सर्वाश्रयाखिलमिदं जगदंशभूत-

sarvāśrayākhilamidaṁ jagadaṁśabhūta-

मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥

mavyākṛtā hi paramā prakṛtistvamādyā || 7||

यस्याः समस्तसुरता समुदीरणेन

yasyāḥ samastasuratā samudīraṇena

तृप्तिं प्रयाति सकलेषु मखेषु देवि ।

tṛptiṁ prayāti sakaleṣu makheṣu devi |

स्वाहासि वै पितृगणस्य च तृप्तिहेतु-

svāhāsi vai pitṛgaṇasya ca tṛptihetu-

रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥

ruccāryase tvamata eva janaiḥ svadhā ca || 8||

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वं

yā muktiheturavicintyamahāvratā tvaṁ

अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।

abhyasyase suniyatendriyatattvasāraiḥ |

मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-

mokṣārthibhirmunibhirastasamastadoṣai-

र्विद्यासि सा भगवती परमा हि देवि ॥ ९ ॥

rvidyāsi sā bhagavatī paramā hi devi || 9||

शब्दात्मिका सुविमलर्ग्यजुषां निधान-

śabdātmikā suvimalargyajuṣāṁ nidhāna-

मुद्गीथरम्यपदपाठवतां च साम्नाम् ।

mudgītharamyapadapāṭhavatāṁ ca sāmnām |

देवि त्रयी भगवती भवभावनाय

devi trayī bhagavatī bhavabhāvanāya

वार्तासि सर्वजगतां परमार्तिहन्त्री ॥ १० ॥

vārtāsi sarvajagatāṁ paramārtihantrī || 10||

मेधासि देवि विदिताखिलशास्त्रसारा

medhāsi devi viditākhilaśāstrasārā

दुर्गासि दुर्गभवसागरनौरसङ्गा ।

durgāsi durgabhavasāgaranaurasaṅgā |

श्रीः कैटभारिहृदयैककृताधिवासा

śrīḥ kaiṭabhārihṛdayaikakṛtādhivāsā

गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥

gaurī tvameva śaśimaulikṛtapratiṣṭhā || 11||

ईषत्सहासममलं परिपूर्णचन्द्र-

īṣatsahāsamamalaṁ paripūrṇacandra-

बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।

bimbānukāri kanakottamakāntikāntam |

अत्यद्भुतं प्रहृतमात्तरुषा तथापि

atyadbhutaṁ prahṛtamāttaruṣā tathāpi

वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥

vaktraṁ vilokya sahasā mahiṣāsureṇa || 12||

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-

dṛṣṭvā tu devi kupitaṁ bhrukuṭīkarāla-

मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।

mudyacchaśāṅkasadṛśacchavi yanna sadyaḥ |

प्राणान् मुमोच महिषस्तदतीव चित्रं

prāṇān mumoca mahiṣastadatīva citraṁ

कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १३ ॥

kairjīvyate hi kupitāntakadarśanena || 13||

देवि प्रसीद परमा भवती भवाय

devi prasīda paramā bhavatī bhavāya

सद्यो विनाशयसि कोपवती कुलानि ।

sadyo vināśayasi kopavatī kulāni |

विज्ञातमेतदधुनैव यदस्तमेत-

vijñātametadadhunaiva yadastameta-

न्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥

nnītaṁ balaṁ suvipulaṁ mahiṣāsurasya || 14||

ते सम्मता जनपदेषु धनानि तेषां

te sammatā janapadeṣu dhanāni teṣāṁ

तेषां यशांसि न च सीदति बन्धुवर्गः ।

teṣāṁ yaśāṁsi na ca sīdati bandhuvargaḥ |

धन्यास्त एव निभृतात्मजभृत्यदारा

dhanyāsta eva nibhṛtātmajabhṛtyadārā

येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५ ॥

yeṣāṁ sadābhyudayadā bhavatī prasannā || 15||

धर्म्याणि देवि सकलानि सदैव कर्मा-

dharmyāaṁi devi sakalāni sadaiva karmā-

ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।

ṇyatyādṛtaḥ pratidinaṁ sukṛtī karoti |

स्वर्गं प्रयाति च ततो भवती प्रसादा-

svargaṁ prayāti ca tato bhavatī prasādā-

ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १६ ॥

llokatraye'pi phaladā nanu devi tena || 16||

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः

durge smṛtā harasi bhītimaśeṣajantoḥ

स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

svasthaiḥ smṛtā matimatīva śubhāṁ dadāsi |

दारिद्र्यदुःखभयहारिणि का त्वदन्या

dāridryaduḥkhabhayahāriṇi kā tvadanyā

सर्वोपकारकरणाय सदार्द्रचित्ता ॥ १७ ॥

sarvopakārakaraṇāya sadārdrahittā || 17||

एभिर्हतैर्जगदुपैति सुखं तथैते

ebhirhatairjagadupaiti sukhaṁ tathaite

कुर्वन्तु नाम नरकाय चिराय पापम् ।

kurvantu nāma narakāya cirāya pāpam |

संग्राममृत्युमधिगम्य दिवं प्रयान्तु

saṅgrāmamṛtyumadhigamya divaṁ prayāntu

मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥

matveti nūnamahitānvinihaṁsi devi || 18||

दृष्ट्वैव किं न भवती प्रकरोति भस्म

dṛṣṭvaiva kiṁ na bhavatī prakaroti bhasma

सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।

sarvāsurānariṣu yatprahiṇoṣi śastram |

लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता

lokānprayāntu ripavo'pi hi śastrapūtā

इत्थं मतिर्भवति तेष्वहितेषुसाध्वी ॥ १९ ॥

itthaṁ matirbhavati teṣvahiteṣusādhvī || 19||

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः

khaḍgaprabhānikaravisphuraṇaistathograiḥ

शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।

śūlāgrakāntinivahena dṛśo'surāṇām |

यन्नागता विलयमंशुमदिन्दुखण्ड-

yannāgatā vilayamaṁśumadindukhaṇḍa-

योग्याननं तव विलोकयतां तदेतत् ॥ २० ॥

yogyānanaṁ tava vilokayatāṁ tadetat || 20||

दुर्वृत्तवृत्तशमनं तव देवि शीलं

durvṛttavṛttaśamanaṁ tava devi śīlaṁ

रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।

rūpaṁ tathaitadavicintyamatulyamanyaiḥ |

वीर्यं च हन्तृ हृतदेवपराक्रमाणां

vīryaṁ ca hantṛ hṛtadevaparākramāṇāṁ

वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१ ॥

vairiṣvapi prakaṭitaiva dayā tvayettham || 21||

केनोपमा भवतु तेऽस्य पराक्रमस्य

kenopamā bhavatu te'sya parākramasya

रूपं च शत्रुभयकार्यतिहारि कुत्र ।

rūpaṁ ca śatrubhayakāryatihāri kutra |

चित्ते कृपा समरनिष्ठुरता च दृष्टा

citte kṛpā samaraniṣṭhuratā ca dṛṣṭā

त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥

tvayyeva devi varade bhuvanatraye'pi || 22||

त्रैलोक्यमेतदखिलं रिपुनाशनेन

trailokyametadakhilaṁ ripunāśanena

त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।

trātaṁ tvayā samaramūrdhani te'pi hatvā |

नीता दिवं रिपुगणा भयमप्यपास्तम्
nītā divaṁ ripugaṇā bhayamapyapāstam

अस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३ ॥
asmākamunmadasurāribhavaṁ namaste || 23||

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
śūlena pāhi no devi pāhi khaḍgena cāmbike |
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ २४ ॥
ghaṇṭāsvanena naḥ pāhi cāpajyāniḥsvanena ca || 24||

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
prācyāṁ rakṣa pratīcyāṁ ca caṇḍike rakṣa dakṣiṇe |
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५ ॥
bhrāmaṇenātmaśūlasya uttarasyāṁ tatheśvari || 25||

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
saumyāni yāni rūpāṇi trailokye vicaranti te |
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ॥ २६ ॥
yāni cātyantaghorāṇi tai rakṣāsmāṁstathā bhuvam || 26||

खड्गशूलगदादीनि यानि चास्त्रानि तेऽम्बिके ।
khaḍgaśūlagadādīni yāni cāstrāni te'mbike |
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥ २७ ॥
karapallavasaṅgīni tairasmān rakṣa sarvataḥ || 27||

ऋषिरुवाच ॥ २८ ॥

ṛṣiruvāca || 28||

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।

evaṁ stutā surairdivyaiḥ kusumairnandanodbhavaiḥ |

अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ २९ ॥

arcitā jagatāṁ dhātrī tathā gandhānulepanaiḥ || 29||

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ।

bhaktyā samastaistridaśairdivyairdhūpaiḥ sudhūpitā |

प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ ३० ॥

prāha prasādasumukhī samastān praṇatān surān || 30||

देव्युवाच ॥ ३१ ॥

devyuvāca || 31||

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ॥ ३२ ॥

vriyatāṁ tridaśāḥ sarve yadasmatto'bhivāñchitam || 32||

देवा ऊचुः ॥ ३३ ॥

devā ūcuḥ || 33||

भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥ ३४ ॥

bhagavatyā kṛtaṁ sarvaṁ na kiñcidavaśiṣyate || 34||

यदयं निहतः शत्रुरस्माकं महिषासुरः ।

yadayaṁ nihataḥ śatrurasmākaṁ mahiṣāsuraḥ |

यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥ ३५ ॥

yadi cāpi varo deyastvayāsmākaṁ maheśvari || 35||

संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।

saṁsmṛtā saṁsmṛtā tvaṁ no hiṁsethāḥ paramāpadaḥ |

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ ३६ ॥

yaśca martya|ḥ stavairebhistvāṁ stoṣyatyamalānane || 36||

तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ।

tasya vittarddhi|vibhavairdhanadārādisampadām |

वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७ ॥

vṛddhaye'smatprasannā tvaṁ bhavethāḥ sarvadāmbike || 37||

ऋषिरुवाच ॥ ३८ ॥

ṛṣiruvāca || 38||

इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ।

iti prasāditā devairjagato'rthe tathātmanaḥ |

तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३९ ॥

tathetyuktvā bhadrakālī babhūvāntarhitā nṛpa || 39||

इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।

ityetatkathitaṁ bhūpa sambhūtā sā yathā purā ।

देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥

devī devaśarīrebhyo jagattrayahitaiṣiṇī ॥ 40॥

पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ।

punaśca gaurīdehātsā samudbhūtā yathābhavat ।

वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ४१ ॥

vadhāya duṣṭadaityānāṁ tathā śumbhaniśumbhayoḥ ॥ 41॥

रक्षणाय च लोकानां देवानामुपकारिणी ।

rakṣaṇāya ca lokānāṁ devānāmupakāriṇī ।

तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ४२ ॥

tacchṛṇuṣva mayākhyātaṁ yathāvatkathayāmi te ॥ 42॥

। ह्रीं ॐ ।

। hrīm om ।

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

॥ svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये शक्रादिस्तुतिर्नाम

devīmāhātmye śakrādistutirnāma

चतुर्थोऽध्यायः ॥ ४ ॥

caturtho'dhyāyaḥ ॥ 4॥

पञ्चमोऽध्यायः

pañcamo'dhyāyaḥ

विनियोगः

viniyogaḥ

अस्य श्री उत्तरचरित्रस्य रुद्र ऋषिः। श्रीमहासरस्वती

asya śrī uttaracaritrasya rudra ṛṣiḥ | śrīmahāsarasvatī

देवता। अनुष्टुप् छन्दः। भीमा शक्तिः। भ्रामरी

devatā | anuṣṭup chandaḥ | bhīmā śaktiḥ | bhrāmarī

बीजम्। सूर्यस्तत्त्वम्। सामवेदः स्वरूपम्।

bījam | sūryastattvam | sāmavedaḥ svarūpam |

श्रीमहासरस्वतीप्रीत्यर्थे उत्तरचरित्रपाठे विनियोगः।

śrīmahāsarasvatīprītyarthe uttaracaritrapāṭhe viniyogaḥ |

। ध्यानम्।

| dhyānam |

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं

ghaṇṭāśūlahalāni śaṅkhamusale cakraṁ dhanuḥ sāyakaṁ

हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
hastābjairdadhatīṁ ghanāntavilasacchītāṁśutulyaprabhām ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
gaurīdehasamudbhavāṁ trijagatāmādhārabhūtāṁ mahā-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥
pūrvāmatra sarasvatīmanubhaje śumbhādidaityārdinīm ।।

ॐ क्लीं ऋषिरुवाच ॥ १ ॥
om klīm ṛṣiruvāca ।। 1।।

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
purā śumbhaniśumbhābhyāmasurābhyāṁ śacīpateḥ ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ २ ॥
trailokyaṁ yajñabhāgāśca hṛtā madabalāśrayāt ।। 2।।

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।
tāveva sūryatāṁ tadvadadhikāraṁ tathaindavam ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥
kauberamatha yāmyaṁ ca cakrāte varuṇasya ca ।। 3।।

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ।
tāveva pavanarddhiṁ ca cakraturvahnikarma ca ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४ ॥
tato devā vinirdhūtā bhraṣṭarājyāḥ parājitāḥ ।। 4।।

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ।

hṛtādhikārāstridaśāstābhyāṁ sarve nirākṛtāḥ |

महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥ ५ ॥

mahāsurābhyāṁ tāṁ devīṁ saṁsmarantyaparājitām || 5||

तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ।

tayāsmākaṁ varo datto yathāpatsu smṛtākhilāḥ |

भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥ ६ ॥

bhavatāṁ nāśayiṣyāmi tatkṣaṇātparamāpadaḥ || 6||

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।

iti kṛtvā matiṁ devā himavantaṁ nageśvaram |

जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ७ ॥

jagmustatra tato devīṁ viṣṇumāyāṁ pratuṣṭuvuḥ || 7||

देवा ऊचुः ॥ ८ ॥

devā ūcuḥ || 8||

नमो देव्यै महादेव्यै शिवायै सततं नमः ।

namo devyai mahādevyai śivāyai satataṁ namaḥ |

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९ ॥

namaḥ prakṛtyai bhadrāyai niyatāḥ praṇatāḥ sma tām || 9||

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।

raudrāyai namo nityāyai gauryai dhātryai namo namaḥ |

ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥ १० ॥

jyotsnāyai cendurūpiṇyai sukhāyai satataṁ namaḥ || 10||

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।

kalyāṇyai praṇatāṁ vṛddhyai siddhyai kurmo namo namaḥ |

नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ ११ ॥

nairṛtyai bhūbhṛtāṁ lakṣmyai śarvāṇyai te namo namaḥ || 11||

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।

durgāyai durgapārāyai sārāyai sarvakāriṇyai |

ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥

khyātyai tathaiva kṛṣṇāyai dhūmrāyai satataṁ namaḥ || 12||

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।

atisaumyātiraudrāyai natāstasyai namo namaḥ |

नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३ ॥

namo jagatpratiṣṭhāyai devyai kṛtyai namo namaḥ || 13||

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।

yā devī sarvabhūteṣu viṣṇumāyeti śabditā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४-१६ ॥

namastasyai namastasyai namastasyai namo namaḥ || 14-16||

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।

yā devī sarvabhūteṣu cetanetyabhidhīyate |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७-१९ ॥

namastasyai namastasyai namastasyai namo namaḥ || 17-19||

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।

yā devī sarvabhūteṣu buddhirūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २०-२२ ॥

namastasyai namastasyai namastasyai namo namaḥ || 20-22||

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।

yā devī sarvabhūteṣu nidrārūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३-२५ ॥

namastasyai namastasyai namastasyai namo namaḥ || 23-25||

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।

yā devī sarvabhūteṣu kṣudhārūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६-२८ ॥

namastasyai namastasyai namastasyai namo namaḥ || 26-28||

या देवी सर्वभूतेषु छायारूपेण संस्थिता ।

yā devī sarvabhūteṣu chāyārūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २९-३१ ॥

namastasyai namastasyai namastasyai namo namaḥ || 29-31||

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।

yā devī sarvabhūteṣu śaktirūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३२-३४ ॥

namastasyai namastasyai namastasyai namo namaḥ || 32-34||

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।

yā devī sarvabhūteṣu tṛṣṇārūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३५-३७ ॥

namastasyai namastasyai namastasyai namo namaḥ || 35-37||

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।

yā devī sarvabhūteṣu kṣāntirūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३८-४० ॥

namastasyai namastasyai namastasyai namo namaḥ || 38-40||

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।

yā devī sarvabhūteṣu jātirūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४१-४३ ॥

namastasyai namastasyai namastasyai namo namaḥ || 41-43||

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।

yā devī sarvabhūteṣu lajjārūpeṇa saṁsthitā |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४४-४६ ॥

namastasyai namastasyai namastasyai namo namaḥ || 44-46||

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।

yā devī sarvabhūteṣu śāntirūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ४७-४९ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 47-49।।

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।

yā devī sarvabhūteṣu śraddhārūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५०-५२ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 50-52।।

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।

yā devī sarvabhūteṣu kāntirūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५३-५५ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 53-55।।

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।

yā devī sarvabhūteṣu lakṣmīrūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५६-५८ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 56-58।।

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।

yā devī sarvabhūteṣu vṛttirūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ५९-६१ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 59-61।।

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।

yā devī sarvabhūteṣu smṛtirūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६२-६४ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 62-64।।

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।

yā devī sarvabhūteṣu dayārūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६५-६७ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 65-67।।

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।

yā devī sarvabhūteṣu tuṣṭirūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६८-७० ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 68-70।।

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।

yā devī sarvabhūteṣu mātṛrūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७१-७३ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 71-73।।

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।

yā devī sarvabhūteṣu bhrāntirūpeṇa saṁsthitā ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७४-७६ ॥

namastasyai namastasyai namastasyai namo namaḥ ।। 74-76।।

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।

indriyāṇāmadhiṣṭhātrī bhūtānāṁ cākhileṣu yā |

भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥

bhūteṣu satataṁ tasyai vyāptyai devyai namo namaḥ || 77||

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत् ।

citirūpeṇa yā kṛtsnametad vyāpya sthitā jagat |

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७८-८० ॥

namastasyai namastasyai namastasyai namo namaḥ || 78-80||

स्तुता सुरैः पूर्वमभीष्टसंश्रया-

stutā suraiḥ pūrvamabhīṣṭasaṁśrayā-

त्तथा सुरेन्द्रेण दिनेषु सेविता ।

ttathā surendreṇa dineṣu sevitā |

करोतु सा नः शुभहेतुरीश्वरी

karotu sā naḥ śubhaheturīśvarī

शुभानि भद्राण्यभिहन्तु चापदः ॥ ८१ ॥

śubhāni bhadrāṇyabhihantu cāpadaḥ || 81||

या साम्प्रतं चोद्धतदैत्यतापितै-

yā sāmpratam coddhatadaityatāpitai-

रस्माभिरीशा च सुरैर्नमस्यते ।

rasmābhirīśā ca surairnamasyate |

या च स्मृता तत्क्षणमेव हन्ति नः

yā ca smṛtā tatkṣaṇameva hanti naḥ

सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ८२ ॥

sarvāpado bhaktivinamramūrtibhiḥ || 82||

ऋषिरुवाच ॥ ८३ ॥

ṛṣiruvāca || 83||

एवं स्तवाभियुक्तानां देवानां तत्र पार्वती ।

evaṁ stavābhiyuktānāṁ devānāṁ tatra pārvatī |

स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ८४ ॥

snātumabhyāyayau toye jāhnavyā nṛpanandana || 84||

साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।

sābravīttān surān subhrūrbhavadbhiḥ stūyate'tra kā |

शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥ ८५ ॥

śarīrakośataścāsyāḥ samudbhūtābravīcchivā || 85||

स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ।

stotraṁ mamaitatkriyate śumbhadaityanirākṛtaiḥ |

देवैः समेतैः समरे निशुम्भेन पराजितैः ॥ ८६ ॥

devaiḥ sametaiḥ samare niśumbhena parājitaiḥ || 86||

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।

śarīrakośādyattasyāḥ pārvatyā niḥsṛtāmbikā |

कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥

kauśikīti samasteṣu tato lokeṣu gīyate || 87||

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ।

tasyāṁ vinirgatāyāṁ tu kṛṣṇābhūtsāpi pārvatī |

कालिकेति समाख्याता हिमाचलकृताश्रया ॥ ८८ ॥

kāliketi samākhyātā himācalakṛtāśrayā || 88||

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।

tato'mbikāṁ paraṁ rūpaṁ bibhrāṇāṁ sumanoharam |

ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥ ८९ ॥

dadarśa caṇḍo muṇḍaśca bhṛtyau śumbhaniśumbhayoḥ || 89||

ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ।

tābhyāṁ śumbhāya cākhyātā sātīva sumanoharā |

काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥ ९० ॥

kāpyāste strī mahārāja bhāsayantī himācalam || 90||

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ।

naiva tādṛk kvacidrūpaṁ dṛṣṭaṁ kenaciduttamam |

ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ९१ ॥

jñāyatāṁ kāpyasau devī gṛhyatāṁ cāsureśvara || 91||

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।

strīratnamaticārvaṅgī dyotayantī diśastviṣā |

सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥ ९२ ॥

sā tu tiṣṭhati daityendra tāṁ bhavān draṣṭumarhati || 92||

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।

yāni ratnāni maṇayo gajāśvādīni vai prabho |

त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥ ९३ ॥

trailokye tu samastāni sāmprataṁ bhānti te gṛhe || 93||

ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।

airāvataḥ samānīto gajaratnaṁ purandarāt |

पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥

pārijātataruścāyaṁ tathaivoccaiḥśravā hayaḥ || 94||

विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ।

vimānaṁ haṁsasaṁyuktametattiṣṭhati te'ṅgaṇe |

रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥ ९५ ॥

ratnabhūtamihānītaṁ yadāsīdvedhaso'dbhutam || 95||

निधिरेष महापद्मः समानीतो धनेश्वरात् ।

nidhireṣa mahāpadmaḥ samānīto dhaneśvarāt |

किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥ ९६ ॥

kiñjalkinīṁ dadau cābdhirmālāmamlānapaṅkajām || 96||

छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।

chatraṁ te vāruṇaṁ gehe kāñcanasrāvi tiṣṭhati ।

तथायं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥ ९७ ॥

tathāyaṁ syandanavaro yaḥ purāsītprajāpateḥ ॥ 97॥

मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।

mṛtyorutkrāntidā nāma śaktirīśa tvayā hṛtā ।

पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ९८ ॥

pāśaḥ salilarājasya bhrātustava parigrahe ॥ 98॥

निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।

niśumbhasyābdhijātāśca samastā ratnajātayaḥ ।

वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥ ९९ ॥

vahnirapi dadau tubhyamagniśauce ca vāsasī ॥ 99॥

एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।

evaṁ daityendra ratnāni samastānyāhṛtāni te ।

स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥

strīratnameṣā kalyāṇī tvayā kasmānna gṛhyate ॥ 100॥

ऋषिरुवाच ॥ १०१ ॥

ṛṣiruvāca || 101||

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।

niśamyeti vacaḥ śumbhaḥ sa tadā caṇḍamuṇḍayoḥ |

प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥ १०२ ॥

preṣayāmāsa sugrīvaṁ dūtaṁ devyā mahāsuram || 102||

इति चेति च वक्तव्या सा गत्वा वचनान्मम ।

iti ceti ca vaktavyā sā gatvā vacanānmama |

यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ॥ १०३ ॥

yathā cābhyeti samprītyā tathā kāryaṁ tvayā laghu || 103||

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।

sa tatra gatvā yatrāste śailoddeśe'tiśobhane |

तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ १०४ ॥

tāṁ ca devīṁ tataḥ prāha ślakṣṇaṁ madhurayā girā || 104||

दूत उवाच ॥ १०५ ॥

dūta uvāca || 105||

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।

devi daityeśvaraḥ śumbhastrailokye parameśvaraḥ |

दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ १०६ ॥

dūto'haṁ preṣitastena tvatsakāśamihāgataḥ || 106||

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।

avyāhatājñaḥ sarvāsu yaḥ sadā devayoniṣu I

निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ १०७ ॥

nirjitākhiladaityāriḥ sa yadāha śṛṇuṣva tat II 107II

मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।

mama trailokyamakhilaṁ mama devā vaśānugāḥ I

यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥ १०८ ॥

yajñabhāgānahaṁ sarvānupāśnāmi pṛthak pṛthak II 108II

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।

trailokye vararatnāni mama vaśyānyaśeṣataḥ I

तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ॥ १०९ ॥

tathaiva gajaratnaṁ ca hṛtaṁ devendravāhanam II 109II

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।

kṣīrodamathanodbhūtamaśvaratnaṁ mamāmaraiḥ I

उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ ११० ॥

uccaiḥśravasasañjñaṁ tatpraṇipatya samarpitam II 110II

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।

yāni cānyāni deveṣu gandharveṣūrageṣu ca I

रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ १११ ॥

ratnabhūtāni bhūtāni tāni mayyeva śobhane II 111II

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
strīratnabhūtāṁ tvāṁ devi loke manyāmahe vayam ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ ११२ ॥
sā tvamasmānupāgaccha yato ratnabhujo vayam ।। 112।।

मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।
māṁ vā mamānujaṁ vāpi niśumbhamuruvikramam ।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥ ११३ ॥
bhaja tvaṁ cañcalāpāṅgi ratnabhūtāsi vai yataḥ ।। 113।।

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
paramaiśvaryamatulaṁ prāpsyase matparigrahāt ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ११४ ॥
etadbuddhyā samālocya matparigrahatāṁ vraja ।। 114।।

ऋषिरुवाच ॥ ११५ ॥
ṛṣiruvāca ।। 115।।

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
ityuktā sā tadā devī gambhīrāntaḥsmitā jagau ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ११६ ॥
durgā bhagavatī bhadrā yayedaṁ dhāryate jagat ।। 116।।

देव्युवाच ॥ ११७ ॥

devyuvāca || 117||

सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ।

satyamuktaṁ tvayā nātra mithyā kiñcittvayoditam |

त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥ ११८ ॥

trailokyādhipatiḥ śumbho niśumbhaścāpi tādṛśaḥ || 118||

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ।

kiṁ tvatra yatpratijñātaṁ mithyā tatkriyate katham |

श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ ११९ ॥

śrūyatāmalpabuddhitvātpratijñā yā kṛtā purā || 119||

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।

yo māṁ jayati saṅgrāme yo me darpaṁ vyapohati |

यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ १२० ॥

yo me pratibalo loke sa me bhartā bhaviṣyati || 120||

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महाबलः ।

tadāgacchatu śumbho'tra niśumbho vā mahābalaḥ |

मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ १२१ ॥

māṁ jitvā kiṁ cireṇātra pāṇiṁ gṛhṇātu me laghu || 121||

दूत उवाच ॥ १२२ ॥

dūta uvāca || 122||

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।

avaliptāsi maivaṁ tvaṁ devi brūhi mamāgrataḥ |

त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥ १२३ ॥

trailokye kaḥ pumāṁstiṣṭhedagre śumbhaniśumbhayoḥ || 123||

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।

anyeṣāmapi daityānāṁ sarve devā na vai yudhi |

तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका ॥ १२४ ॥

tiṣṭhanti sammukhe devi kiṁ punaḥ strī tvamekikā || 124||

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।

indrādyāḥ sakalā devāstasthuryeṣāṁ na saṁyuge |

शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् ॥ १२५ ॥

śumbhādīnāṁ kathaṁ teṣāṁ strī prayāsyasi sammukham || 125||

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।

sā tvaṁ gaccha mayaivoktā pārśvaṁ śumbhaniśumbhayoḥ |

केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥ १२६ ॥

keśākarṣaṇanirdhūtagauravā mā gamiṣyasi || 126||

देव्युवाच ॥ १२७ ॥

devyuvāca || 127||

एवमेतद् बली शुम्भो निशुम्भश्चापितादृशः ।

evametad balī śumbho niśumbhaścāpitādṛśaḥ |

किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ १२८ ॥

kiṁ karomi pratijñā me yadanālocitā purā || 128||

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ।

sa tvaṁ gaccha mayoktaṁ te yadetatsarvamādṛtaḥ |

तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥ १२९ ॥

tadācakṣvāsurendrāya sa ca yuktaṁ karotu yat || 129||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये देव्या दूतसंवादो नाम

devīmāhātmye devyā dūtasaṁvādo nāma

पञ्चमोऽध्यायः ॥ ५ ॥

pañcamo'dhyāyaḥ || 5||

षष्ठोऽध्यायः

ṣaṣṭho'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।

ityākarṇya vaco devyāḥ sa dūto'marṣapūritaḥ |

समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥

samācaṣṭa samāgamya daityarājāya vistarāt || 2||

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।

tasya dūtasya tadvākyamākarṇyāsurarāṭ tataḥ |

सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥ ३ ॥

sakrodhaḥ prāha daityānāmadhipaṁ dhūmralocanam || 3||

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।

he dhūmralocanāśu tvaṁ svasainyaparivāritaḥ |

तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥

tāmānaya balādduṣṭāṁ keśākarṣaṇavihvalām || 4||

तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ।

tatparitrāṇadaḥ kaścidyadi vottiṣṭhate'paraḥ |

स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥ ५ ॥

sa hantavyo'maro vāpi yakṣo gandharva eva vā || 5||

ऋषिरुवाच ॥ ६ ॥

ṛṣiruvāca || 6||

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।

tenājñaptastataḥ śīghraṁ sa daityo dhūmralocanaḥ |

वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ७ ॥

vṛtaḥ ṣaṣṭyā sahasrāṇāmasurāṇāṁ drutaṁ yayau || 7||

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ।

sa dṛṣṭvā tāṁ tato devīṁ tuhinācalasaṁsthitām |

जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥ ८ ॥

jagādoccaiḥ prayāhīti mūlaṁ śumbhaniśumbhayoḥ || 8||

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ।

na cetprītyādya bhavatī madbhartāramupaiṣyati |

ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥

tato balānnayāmyeṣa keśākarṣaṇavihvalām || 9||

देव्युवाच ॥ १० ॥

devyuvāca || 10||

दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ।

daityeśvareṇa prahito balavānbalasaṁvṛtaḥ |

बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११ ॥

balānnayasi māmevaṁ tataḥ kiṁ te karomyaham || 11||

ऋषिरुवाच ॥ १२ ॥

ṛṣiruvāca || 12||

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।

ityuktaḥ so'bhyadhāvattāmasuro dhūmralocanaḥ |

हुंकारेणैव तं भस्म सा चकाराम्बिका तदा ॥ १३ ॥

huṅkāreṇaiva taṁ bhasma sā cakārāmbikā tadā || 13||

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ।

atha kruddhaṁ mahāsainyamasurāṇāṁ tathāmbikā |

ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥

vavarṣa sāyakaistīkṣṇaistathā śaktiparaśvadhaiḥ || 14||

ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ।

tato dhutasaṭaḥ kopātkṛtvā nādaṁ subhairavam |

पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥

papātāsurasenāyāṁ siṁho devyāḥ svavāhanaḥ || 15||

कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ।

kāṁścitkaraprahāreṇa daityānāsyena cāparān |

आक्रान्त्या चाधरेणान्यान् जघान स महासुरान् ॥ १६ ॥

ākrāntyā cādhareṇānyān jaghāna sa mahāsurān || 16||

केषांचित्पाटयामास नखैः कोष्ठानि केसरी ।

keṣāñcitpāṭayāmāsa nakhaiḥ koṣṭhāni kesarī |

तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १७ ॥

tathā talaprahāreṇa śirāṁsi kṛtavānpṛthak || 17||

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।

vicchinnabāhuśirasaḥ kṛtāstena tathāpare |

पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १८ ॥

papau ca rudhiraṁ koṣṭhādanyeṣāṁ dhutakesaraḥ || 18||

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।

kṣaṇena tadbalaṁ sarvaṁ kṣayaṁ nītaṁ mahātmanā |

तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १९ ॥

tena kesariṇā devyā vāhanenātikopinā || 19||

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।

śrutvā tamasuraṁ devyā nihataṁ dhūmralocanam |

बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥ २० ॥

balaṁ ca kṣayitaṁ kṛtsnaṁ devīkesariṇā tataḥ || 20||

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।

cukopa daityādhipatiḥ śumbhaḥ prasphuritādharaḥ |

आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ २१ ॥

ājñāpayāmāsa ca tau caṇḍamuṇḍau mahāsurau || 21||

हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ।

he caṇḍa he muṇḍa balairbahubhiḥ parivāritau |

तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ २२ ॥

tatra gacchata gatvā ca sā samānīyatāṁ laghu || 22||

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।

keśeṣvākṛṣya baddhvā vā yadi vaḥ saṁśayo yudhi |

तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥

tadāśeṣāyudhaiḥ sarvairasurairvinihanyatām || 23||

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।

tasyāṁ hatāyāṁ duṣṭāyāṁ siṁhe ca vinipātite |

शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥ २४ ॥

śīghramāgamyatāṁ baddhvā gṛhītvā tāmathāmbikām || 24||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये शुम्भनिशुम्भसेनानीधूम्रलोचनवधो

devīmāhātmye śumbhaniśumbhasenānīdhūmralocanavadho

नाम षष्ठोऽध्यायः ॥ ६ ॥

nāma ṣaṣṭho'dhyāyaḥ || 6||

सप्तमोऽध्यायः

saptamo'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।

ājñaptāste tato daityāścaṇḍamuṇḍapurogamāḥ |

चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥

caturaṅgabalopetā yayurabhyudyatāyudhāḥ || 2||

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।

dadṛśuste tato devīmīṣaddhāsāṁ vyavasthitām |

सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥ ३ ॥

siṁhasyopari śailendraśṛṅge mahati kāñcane || 3||

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।

te dṛṣṭvā tāṁ samādātumudyamaṁ cakrurudyatāḥ |

आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ४ ॥

ākṛṣṭacāpāsidharāstathānye tatsamīpagāḥ || 4||

ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति ।

tataḥ kopaṁ cakāroccairambikā tānarīnprati |

कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥ ५ ॥

kopena cāsyā vadanaṁ maṣīvarṇamabhūttadā || 5||

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।

bhrukuṭīkuṭilāttasyā lalāṭaphalakāddrutam |

काली करालवदना विनिष्क्रान्तासिपाशिनी ॥ ६ ॥

kālī karālavadanā viniṣkrāntāsipāśinī || 6||

विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।

vicitrakhaṭvāṅgadharā naramālāvibhūṣaṇā |

द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ ७ ॥

dvīpicarmaparīdhānā śuṣkamāṁsātibhairavā || 7||

अतिविस्तारवदना जिह्वाललनभीषणा ।

ativistāravadanā jihvālalanabhīṣaṇā |

निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥

nimagnāraktanayanā nādāpūritadiṅmukhā || 8||

सा वेगेनाभिपतिता घातयन्ती महासुरान् ।

sā vegenābhipatitā ghātayantī mahāsurān |

सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥

sainye tatra surārīṇāmabhakṣayata tadbalam || 9||

पार्ष्णिग्राहाङ्कुशग्राहयोधघण्टासमन्वितान् ।

pārṣṇigrāhāṅkuśagrāhayodhaghaṇṭāsamanvitān |

समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥ १० ॥

samādāyaikahastena mukhe cikṣepa vāraṇān || 10||

तथैव योधं तुरगै रथं सारथिना सह ।

tathaiva yodhaṁ turagai rathaṁ sārathinā saha |

निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥ ११ ॥

nikṣipya vaktre daśanaiścarvayantyatibhairavam || 11||

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।

ekaṁ jagrāha keśeṣu grīvāyāmatha cāparam |

पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥ १२ ॥

pādenākramya caivānyamurasānyamapothayat || 12||

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।

tairmuktāni ca śastrāṇi mahāstrāṇi tathāsuraiḥ |

मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १३ ॥

mukhena jagrāha ruṣā daśanairmathitānyapi || 13||

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ।

balināṁ tadbalaṁ sarvamasurāṇāṁ durātmanām |

ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा ॥ १४ ॥

mamardābhakṣayaccānyānanyāṁścātāḍayattadā || 14||

असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।

asinā nihatāḥ kecitkecitkhaṭvāṅgatāḍitāḥ ।

जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥ १५ ॥

jagmurvināśamasurā dantāgrābhihatāstathā ।। 15।।

क्षणेन तद्बलं सर्वमसुराणां निपातितम् ।

kṣaṇena tadbalaṁ sarvamasurāṇāṁ nipātitam ।

दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥ १६ ॥

dṛṣṭvā caṇḍo'bhidudrāva tāṁ kālīmatibhīṣaṇām ।। 16।।

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।

śaravarṣairmahābhīmairbhīmākṣīṁ tāṁ mahāsuraḥ ।

छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १७ ॥

chādayāmāsa cakraiśca muṇḍaḥ kṣiptaiḥ sahasraśaḥ ।। 17।।

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।

tāni cakrāṇyanekāni viśamānāni tanmukham ।

बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥ १८ ॥

babhuryathārkabimbāni subahūni ghanodaram ।। 18।।

ततो जहासातिरुषा भीमं भैरवनादिनी ।

tato jahāsātiruṣā bhīmaṁ bhairavanādinī ।

काली करालवदना दुर्दर्शदशनोज्ज्वला ॥ १९ ॥

kālī karālavadanā durdarśadaśanojjvalā ।। 19।।

उत्थाय च महासिंहं देवी चण्डमधावत ।

utthāya ca mahāsiṁhaṁ devī caṇḍamadhāvata |

गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ २० ॥

gṛhītvā cāsya keśeṣu śirastenāsinācchinat || 20||

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।

atha muṇḍo'bhyadhāvattāṁ dṛṣṭvā caṇḍaṁ nipātitam |

तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१ ॥

tamapyapātayadbhūmau sā khaḍgābhihataṁ ruṣā || 21||

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।

hataśeṣaṁ tataḥ sainyaṁ dṛṣṭvā caṇḍaṁ nipātitam |

मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥

muṇḍaṁ ca sumahāvīryaṁ diśo bheje bhayāturam || 22 ||

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।

śiraścaṇḍasya kālī ca gṛhītvā muṇḍameva ca |

प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥ २३ ॥

prāha pracaṇḍāṭṭahāsamiśramabhyetya caṇḍikām || 23||

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।

mayā tavātropahṛtau caṇḍamuṇḍau mahāpaśū |

युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥ २४ ॥

yuddhayajñe svayaṁ śumbhaṁ niśumbhaṁ ca haniṣyasi || 24||

ऋषिरुवाच ॥ २५ ॥

ṛṣiruvāca || 25||

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।

tāvānītau tato dṛṣṭvā caṇḍamuṇḍau mahāsurau |

उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥ २६ ॥

uvāca kālīṁ kalyāṇī lalitaṁ caṇḍikā vacaḥ || 26||

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।

yasmāccaṇḍaṁ ca muṇḍaṁ ca gṛhītvā tvamupāgatā |

चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥ २७ ॥

cāmuṇḍeti tato loke khyātā devī bhaviṣyasi || 27||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये चण्डमुण्डवधो नाम

devīmāhātmye caṇḍamuṇḍavadho nāma

सप्तमोऽध्यायः ॥ ७ ॥

saptamo'dhyāyaḥ || 7||

अष्टमोऽध्यायः

aṣṭamo'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।

caṇḍe ca nihate daitye muṇḍe ca vinipātite |

बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २ ॥

bahuleṣu ca sainyeṣu kṣayiteṣvasureśvaraḥ || 2||

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।

tataḥ kopaparādhīnacetāḥ śumbhaḥ pratāpavān |

उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३ ॥

udyogaṁ sarvasainyānāṁ daityānāmādideśa ha || 3||

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।

adya sarvabalairdaityāḥ ṣaḍaśītirudāyudhāḥ |

कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ४ ॥

kambūnāṁ caturaśītirniryāntu svabalairvṛtāḥ || 4||

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।

koṭivīryāṇi pañcāśadasurāṇāṁ kulāni vai |

शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५ ॥

śataṁ kulāni dhaumrāṇāṁ nirgacchantu mamājñayā || 5||

कालका दौर्हृदा मौर्वाः कालिकेयास्तथासुराः ।

kālakā daurhṛdā maurvāḥ kālikeyāstathāsurāḥ |

युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥ ६ ॥

yuddhāya sajjā niryāntu ājñayā tvaritā mama || 6||

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।

ityājñāpyāsurapatiḥ śumbho bhairavaśāsanaḥ |

निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ७ ॥

nirjagāma mahāsainyasahasrairbahubhirvṛtaḥ || 7||

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।

āyāntaṁ caṇḍikā dṛṣṭvā tatsainyamatibhīṣaṇam |

ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥ ८ ॥

jyāsvanaiḥ pūrayāmāsa dharaṇīgaganāntaram || 8||

ततः सिंहो महानादमतीव कृतवान्नृप ।

tataḥ siṁho mahānādamatīva kṛtavānnṛpa |

घण्टास्वनेन तान्नादानम्बिका चोपबृंहयत् ॥ ९ ॥

ghaṇṭāsvanena tānnādānambikā copabṛṁhayat || 9||

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।

dhanurjyāsiṁhaghaṇṭānāṁ nādāpūritadiṅmukhā |

निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ १० ॥

ninādairbhīṣaṇaiḥ kālī jigye vistāritānanā || 10||

तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।

taṁ ninādamupaśrutya daityasainyaiścaturdiśam |

देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥ ११ ॥

devī siṁhastathā kālī saroṣaiḥ parivāritāḥ || 11||

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।

etasminnantare bhūpa vināśāya suradviṣām |

भवायामरसिंहानामतिवीर्यबलान्विताः ॥ १२ ॥

bhavāyāmarasiṁhānāmativīryabalānvitāḥ || 12||

ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।

brahmeśaguhaviṣṇūnāṁ tathendrasya ca śaktayaḥ |

शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३ ॥

śarīrebhyo viniṣkramya tadrūpaiścaṇḍikāṁ yayuḥ || 13||

यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ।

yasya devasya yadrūpaṁ yathā bhūṣaṇavāhanam |

तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ १४ ॥

tadvadeva hi tacchaktirasurānyoddhumāyayau || 14||

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।

haṁsayuktavimānāgre sākṣasūtrakamaṇḍaluḥ |

आयाता ब्रह्मणः शक्तिर्ब्रह्माणीत्यभिधीयते ॥ १५ ॥

āyātā brahmaṇaḥ śaktirbrahmāṇītyabhidhīyate || 15||

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।

māheśvarī vṛṣārūḍhā triśūlavaradhāriṇī |

महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥ १६ ॥

mahāhivalayā prāptā candrarekhāvibhūṣaṇā || 16||

कौमारी शक्तिहस्ता च मयूरवरवाहना ।

kaumārī śaktihastā ca mayūravaravāhanā |

योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥ १७ ॥

yoddhumabhyāyayau daityānambikā guharūpiṇī || 17||

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।

tathaiva vaiṣṇavī śaktirgaruḍopari saṁsthitā |

शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १८ ॥

śaṅkhacakragadāśārṅgakhaḍgahastābhyupāyayau || 18||

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।

yajñavārāhamatulaṁ rūpaṁ yā bibhrato hareḥ |

शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९ ॥

śaktiḥ sāpyāyayau tatra vārāhīṁ bibhratī tanum || 19||

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।

nārasiṁhī nṛsiṁhasya bibhratī sadṛśaṁ vapuḥ |

प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ २० ॥

prāptā tatra saṭākṣepakṣiptanakṣatrasaṁhatiḥ || 20||

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।

vajrahastā tathaivaindrī gajarājopari sthitā |

प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥ २१ ॥

prāptā sahasranayanā yathā śakrastathaiva sā || 21||

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।

tataḥ parivṛtastābhirīśāno devaśaktibhiḥ |

हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २२ ॥

hanyantāmasurāḥ śīghraṁ mama prītyāha caṇḍikām || 22||

ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।

tato devīśarīrāttu viniṣkrāntātibhīṣaṇā |

चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥ २३ ॥

caṇḍikā śaktiratyugrā śivāśataninādinī || 23||

सा चाह धूम्रजटिलमीशानमपराजिता ।

sā cāha dhūmrajaṭilamīśānamaparājitā |

दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥ २४ ॥

dūta tvaṁ gaccha bhagavan pārśvaṁ śumbhaniśumbhayoḥ || 24||

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।

brūhi śumbhaṁ niśumbhaṁ ca dānavāvatigarvitau |

ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥

ye cānye dānavāstatra yuddhāya samupasthitāḥ || 25||

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।

trailokyamindro labhatāṁ devāḥ santu havirbhujaḥ |

यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २६ ॥

yūyaṁ prayāta pātālaṁ yadi jīvitumicchatha || 26||

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ।

balāvalepādatha cedbhavanto yuddhakāṅkṣiṇaḥ |

तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २७ ॥

tadāgacchata tṛpyantu macchivāḥ piśitena vaḥ || 27||

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।

yato niyukto dautyena tayā devyā śivaḥ svayam |

शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ २८ ॥

śivadūtīti loke'smiṁstataḥ sā khyātimāgatā || 28||

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।

te'pi śrutvā vaco devyāḥ śarvākhyātaṁ mahāsurāḥ |

अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥ २९ ॥

amarṣāpūritā jagmuryatra kātyāyanī sthitā || 29||

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।

tataḥ prathamamevāgre śaraśaktyṛṣṭivṛṣṭibhiḥ ।

ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ ३० ॥

vavarṣuruddhatāmarṣāstāṁ devīmamarārayaḥ ।। 30।।

सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ।

sā ca tān prahitān bāṇāñchūlaśaktiparaśvadhān ।

चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥ ३१ ॥

ciccheda līlayādhmātadhanurmuktairmaheṣubhiḥ ।। 31।।

तस्याग्रतस्तथा काली शूलपातविदारितान् ।

tasyāgratastathā kālī śūlapātavidāritān ।

खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३२ ॥

khaṭvāṅgapothitāṁścārīnkurvatī vyacarattadā ।। 32।।

कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ।

kamaṇḍalujalākṣepahatavīryān hataujasaḥ ।

ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ॥ ३३ ॥

brahmāṇī cākarocchatrūnyena yena sma dhāvati ।। 33।।

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।

māheśvarī triśūlena tathā cakreṇa vaiṣṇavī ।

दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥ ३४ ॥

daityāñjaghāna kaumārī tathā śaktyātikopanā ।। 34।।

ऐन्द्री कुलिशपातेन शतशो दैत्यदानवाः ।

aindrī kuliśapātena śataśo daityadānavāḥ |

पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३५ ॥

peturvidāritāḥ pṛthvyāṁ rudhiraughapravarṣiṇaḥ || 35||

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।

tuṇḍaprahāravidhvastā daṁṣṭrāgrakṣatavakṣasaḥ |

वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३६ ॥

vārāhamūrtyā nyapataṁścakreṇa ca vidāritāḥ || 36||

नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।

nakhairvidāritāṁścānyān bhakṣayantī mahāsurān |

नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥ ३७ ॥

nārasiṁhī cacārājau nādāpūrṇadigambarā || 37||

चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।

caṇḍāṭṭahāsairasurāḥ śivadūtyabhidūṣitāḥ |

पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३८ ॥

petuḥ pṛthivyāṁ patitāṁstāṁścakhādātha sā tadā || 38||

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।

iti mātṛgaṇaṁ kruddhaṁ mardayantaṁ mahāsurān |

दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥

dṛṣṭvābhyupāyairvividhairneśurdevārisainikāḥ || 39||

पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ।

palāyanaparāndṛṣṭvā daityānmātṛgaṇārditān ।

योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥

yoddhumabhyāyayau kruddho raktabījo mahāsuraḥ ।। 40।।

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।

raktabinduryadā bhūmau patatyasya śarīrataḥ ।

समुत्पतति मेदिन्यां तत्प्रमाणो महासुरः ॥ ४१ ॥

samutpatati medinyāṁ tatpramāṇo mahāsuraḥ ।। 41।।

युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।

yuyudhe sa gadāpāṇirindraśaktyā mahāsuraḥ ।

ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥

tataścaindrī svavajreṇa raktabījamatāḍayat ।। 42।।

कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।

kuliśenāhatasyāśu bahu susrāva śoṇitam ।

समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥

samuttasthustato yodhāstadrūpāstatparākramāḥ ।। 43।।

यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।

yāvantaḥ patitāstasya śarīrādraktabindavaḥ ।

तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥

tāvantaḥ puruṣā jātāstadvīryabalavikramāḥ ।। 44।।

ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।

te cāpi yuyudhustatra puruṣā raktasambhavāḥ ।

समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ ४५ ॥

samaṁ mātṛbhiratyugraśastrapātātibhīṣaṇam ।। 45।।

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।

punaśca vajrapātena kṣatamasya śiro yadā ।

ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥

vavāha raktaṁ puruṣāstato jātāḥ sahasraśaḥ ।। 46।।

वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।

vaiṣṇavī samare cainaṁ cakreṇābhijaghāna ha ।

गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥ ४७ ॥

gadayā tāḍayāmāsa aindrī tamasureśvaram ।। 47।।

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।

vaiṣṇavīcakrabhinnasya rudhirasrāvasambhavaiḥ ।

सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४८ ॥

sahasraśo jagadvyāptaṁ tatpramāṇairmahāsuraiḥ ।। 48।।

शक्त्या जघान कौमारी वाराही च तथासिना ।

śaktyā jaghāna kaumārī vārāhī ca tathāsinā ।

माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥ ४९ ॥

māheśvarī triśūlena raktabījaṁ mahāsuram ।। 49।।

स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ।

sa cāpi gadayā daityaḥ sarvā evāhanat pṛthak ।

मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥

mātṝḥ kopasamāviṣṭo raktabījo mahāsuraḥ ।। 50।।

तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।

tasyāhatasya bahudhā śaktiśūlādibhirbhuvi ।

पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ ५१ ॥

papāta yo vai raktaughastenāsañchataśo'surāḥ ।। 51।।

तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।

taiścāsurāsṛksambhūtairasuraiḥ sakalaṁ jagat ।

व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५२ ॥

vyāptamāsīttato devā bhayamājagmuruttamam ।। 52।।

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राहसत्वरम् ।

tān viṣaṇṇān surān dṛṣṭvā caṇḍikā prāhasatvaram ।

उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥ ५३ ॥

uvāca kālīṁ cāmuṇḍe vistīrṇaṁ vadanaṁ kuru ।। 53।।

मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।

macchastrapātasambhūtān raktabindūn mahāsurān ।

रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥ ५४ ॥

raktabindoḥ pratīccha tvaṁ vaktreṇānena veginā ।। 54।।

भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।

bhakṣayantī cara raṇe tadutpannānmahāsurān |

एवमेष क्षयं दैत्यः क्षेणरक्तो गमिष्यति ॥ ५५ ॥

evameṣa kṣayaṁ daityaḥ kṣeṇarakto gamiṣyati || 55||

भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।

bhakṣyamāṇāstvayā cogrā na cotpatsyanti cāpare |

इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥ ५६ ॥

ityuktvā tāṁ tato devī śūlenābhijaghāna tam || 56||

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।

mukhena kālī jagṛhe raktabījasya śoṇitam |

ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥ ५७ ॥

tato'sāvājaghānātha gadayā tatra caṇḍikām || 57||

न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।

na cāsyā vedanāṁ cakre gadāpāto'lpikāmapi |

तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५८ ॥

tasyāhatasya dehāttu bahu susrāva śoṇitam || 58||

यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।

yatastatastadvaktreṇa cāmuṇḍā sampratīcchati |

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥ ५९ ॥

mukhe samudgatā ye'syā raktapātānmahāsurāḥ || 59||

तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ।

tāṁścakhādātha cāmuṇḍā papau tasya ca śoṇitam |

देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥ ६० ॥

devī śūlena vajreṇa bāṇairasibhirṛṣṭibhiḥ || 60||

जघान रक्तबीजं तं चामुण्डापीतशोणितम् ।

jaghāna raktabījaṁ taṁ cāmuṇḍāpītaśoṇitam |

स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ॥ ६१ ॥

sa papāta mahīpṛṣṭhe śastrasaṅghasamāhataḥ || 61||

नीरक्तश्च महीपाल रक्तबीजो महासुरः ।

nīraktaśca mahīpāla raktabījo mahāsuraḥ |

ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥ ६२ ॥

tataste harṣamatulamavāpustridaśā nṛpa || 62||

तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६३ ॥

teṣāṁ mātṛgaṇo jāto nanartāsṛṅmadoddhataḥ || 63||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये रक्तबीजवधो

devīmāhātmye raktabījavadho

नामाष्टमोऽध्यायः ॥ ८ ॥

nāmāṣṭamo'dhyāyaḥ || 8||

नवमोऽध्यायः

navamo'dhyāyaḥ

ॐ राजोवाच ॥ १ ॥

om rājovāca || 1||

विचित्रमिदमाख्यातं भगवन् भवता मम ।

vicitramidamākhyātaṁ bhagavan bhavatā mama |

देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥

devyāścaritamāhātmyaṁ raktabījavadhāśritam || 2||

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।

bhūyaścecchāmyahaṁ śrotuṁ raktabīje nipātite |

चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥ ३ ॥

cakāra śumbho yatkarma niśumbhaścātikopanaḥ || 3||

ऋषिरुवाच ॥ ४ ॥

ṛṣiruvāca || 4||

चकार कोपमतुलं रक्तबीजे निपातिते ।

cakāra kopamatulaṁ raktabīje nipātite |

शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५ ॥

śumbhāsuro niśumbhaśca hateṣvanyeṣu cāhave || 5||

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।

hanyamānaṁ mahāsainyaṁ vilokyāmarṣamudvahan |

अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥ ६ ॥

abhyadhāvanniśumbho'tha mukhyayāsurasenayā || 6||

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।

tasyāgratastathā pṛṣṭhe pārśvayośca mahāsurāḥ |

संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ७ ॥

sandaṣṭauṣṭhapuṭāḥ kruddhā hantuṁ devīmupāyayuḥ || 7||

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।

ājagāma mahāvīryaḥ śumbho'pi svabalairvṛtaḥ |

निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ८ ॥

nihantuṁ caṇḍikāṁ kopātkṛtvā yuddhaṁ tu mātṛbhiḥ || 8||

ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः ।

tato yuddhamatīvāsīddevyā śumbhaniśumbhayoḥ |

शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ९ ॥

śaravarṣamatīvograṁ meghayoriva varṣatoḥ || 9||

चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ।

cicchedāstāñcharāṁstābhyāṁ caṇḍikā svaśarotkaraiḥ |

ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥

tāḍayāmāsa cāṅgeṣu śastraughairasureśvarau || 10||

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।

niśumbho niśitaṁ khaḍgaṁ carma cādāya suprabham |

अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥

atāḍayanmūrdhni siṁhaṁ devyā vāhanamuttamam || 11||

ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ।

tāḍite vāhane devī kṣurapreṇāsimuttamam |

निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥ १२ ॥

niśumbhasyāśu ciccheda carma cāpyaṣṭacandrakam || 12||

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।

chinne carmaṇi khaḍge ca śaktiṁ cikṣepa so'suraḥ |

तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ १३ ॥

tāmapyasya dvidhā cakre cakreṇābhimukhāgatām || 13||

कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।

kopādhmāto niśumbho'tha śūlaṁ jagrāha dānavaḥ |

आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥

āyātaṁ muṣṭipātena devī taccāpyacūrṇayat || 14||

आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ।

āvidhyātha gadāṁ so'pi cikṣepa caṇḍikāṁ prati |

सापि देव्यास् त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १५ ॥

sāpi devyās triśūlena bhinnā bhasmatvamāgatā || 15||

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।

tataḥ paraśuhastaṁ tamāyāntaṁ daityapuṅgavam |

आहत्य देवी बाणौघैरपातयत भूतले ॥ १६ ॥

āhatya devī bāṇaughairapātayata bhūtale || 16||

तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।

tasminnipatite bhūmau niśumbhe bhīmavikrame |

भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥ १७ ॥

bhrātaryatīva saṅkruddhaḥ prayayau hantumambikām || 17||

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।

sa rathasthastathātyuccairgṛhītaparamāyudhaiḥ |

भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥ १८ ॥

bhujairaṣṭābhiratulairvyāpyāśeṣaṁ babhau nabhaḥ || 18||

तमायान्तं समालोक्य देवी शङ्खमवादयत् ।

tamāyāntaṁ samālokya devī śaṅkhamavādayat ।

ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥ १९ ॥

jyāśabdaṁ cāpi dhanuṣaścakārātīva duḥsaham ।। 19।।

पूरयामास ककुभो निजघण्टास्वनेन च ।

pūrayāmāsa kakubho nijaghaṇṭāsvanena ca ।

समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ २० ॥

samastadaityasainyānāṁ tejovadhavidhāyinā ।। 20।।

ततः सिंहो महानादैस्त्याजितेभमहामदैः ।

tataḥ siṁho mahānādaistyājitebhamahāmadaiḥ ।

पूरयामास गगनं गां तथैव दिशो दश ॥ २१ ॥

pūrayāmāsa gaganaṁ gāṁ tathaiva diśo daśa ।। 21।।

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।

tataḥ kālī samutpatya gaganaṁ kṣmāmatāḍayat ।

कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥ २२ ॥

karābhyāṁ tanninādena prāksvanāste tirohitāḥ ।। 22।।

अट्टाट्टहासमशिवं शिवदूती चकार ह ।

aṭṭāṭṭahāsamaśivaṁ śivadūtī cakāra ha ।

वैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥ २३ ॥

vaiḥ śabdairasurāstresuḥ śumbhaḥ kopaṁ paraṁ yayau ।। 23।।

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।

durātmaṁstiṣṭha tiṣṭheti vyājahārāmbikā yadā |

तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ २४ ॥

tadā jayetyabhihitaṁ devairākāśasaṁsthitaiḥ || 24||

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।

śumbhenāgatya yā śaktirmuktā jvālātibhīṣaṇā |

आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २५ ॥

āyāntī vahnikūṭābhā sā nirastā maholkayā || 25||

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।

siṁhanādena śumbhasya vyāptaṁ lokatrayāntaram |

निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ २६ ॥

nirghātaniḥsvano ghoro jitavānavanīpate || 26||

शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।

śumbhamuktāñcharāndevī śumbhastatprahitāñcharān |

चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २७ ॥

ciccheda svaśarairugraiḥ śataśo'tha sahasraśaḥ || 27||

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।

tataḥ sā caṇḍikā kruddhā śūlenābhijaghāna tam |

स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २८ ॥

sa tadābhihato bhūmau mūrcchito nipapāta ha || 28||

ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ।

tato niśumbhaḥ samprāpya cetanāmāttakārmukaḥ |

आजघान शरैर्देवीं कालीं केसरिणं तथा ॥ २९ ॥

ājaghāna śarairdevīṁ kālīṁ kesariṇaṁ tathā || 29||

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।

punaśca kṛtvā bāhūnāmayutaṁ danujeśvaraḥ |

चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥ ३० ॥

cakrāyudhena ditijaśchādayāmāsa caṇḍikām || 30||

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।

tato bhagavatī kruddhā durgā durgārtināśinī |

चिच्छेद देवी चक्राणि स्वशरैः सायकांश्च तान् ॥ ३१ ॥

ciccheda devī cakrāṇi svaśaraiḥ sāyakāṁśca tān || 31||

ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।

tato niśumbho vegena gadāmādāya caṇḍikām |

अभ्यधावत वै हन्तुं दैत्यसैन्यसमावृतः ॥ ३२ ॥

abhyadhāvata vai hantuṁ daityasainyasamāvṛtaḥ || 32||

तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।

tasyāpatata evāśu gadāṁ ciccheda caṇḍikā |

खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥

khaḍgena śitadhāreṇa sa ca śūlaṁ samādade || 33||

शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।
śūlahastaṁ samāyāntaṁ niśumbhamamarārdanam ǀ
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३४ ॥
hṛdi vivyādha śūlena vegāviddhena caṇḍikā ǀǀ 34ǀǀ

भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
bhinnasya tasya śūlena hṛdayānniḥsṛto'paraḥ ǀ
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥
mahābalo mahāvīryastiṣṭheti puruṣo vadan ǀǀ 35ǀǀ

तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
tasya niṣkrāmato devī prahasya svanavattataḥ ǀ
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३६ ॥
śiraściccheda khaḍgena tato'sāvapatadbhuvi ǀǀ 36ǀǀ

ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ।
tataḥ siṁhaścakhādogradaṁṣṭrākṣuṇṇaśirodharān ǀ
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७ ॥
asurāṁstāṁstathā kālī śivadūtī tathāparān ǀǀ 37ǀǀ

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
kaumārīśaktinirbhinnāḥ kecinneśurmahāsurāḥ ǀ
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३८ ॥
brahmāṇīmantrapūtena toyenānye nirākṛtāḥ ǀǀ 38ǀǀ

माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ।

māheśvarītriśūlena bhinnāḥ petustathāpare |

वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥ ३९ ॥

vārāhītuṇḍaghātena keciccūrṇīkṛtā bhuvi || 39||

खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।

khaṇḍaṁ khaṇḍaṁ ca cakreṇa vaiṣṇavyā dānavāḥ kṛtāḥ |

वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥ ४० ॥

vajreṇa caindrīhastāgravimuktena tathāpare || 40||

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।

kecidvineśurasurāḥ kecinnaṣṭā mahāhavāt |

भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥

bhakṣitāścāpare kālīśivadūtīmṛgādhipaiḥ || 41||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये निशुम्भवधो नाम

devīmāhātmye niśumbhavadho nāma

नवमोऽध्यायः ॥ ९ ॥

navamo'dhyāyaḥ || 9||

दशमोऽध्यायः

daśamo'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् ।

niśumbhaṁ nihataṁ dṛṣṭvā bhrātaraṁ prāṇasammitam |

हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥ २ ॥

hanyamānaṁ balaṁ caiva śumbhaḥ kruddho'bravīdvacaḥ || 2||

बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह ।

balāvalepaduṣṭe tvaṁ mā durge garvamāvaha |

अन्यासां बलमाश्रित्य युद्ध्यसे चातिमानिनी ॥ ३ ॥

anyāsāṁ balamāśritya yuddhyase cātimāninī || 3||

देव्युवाच ॥ ४ ॥

devyuvāca ||4||

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।

ekaivāhaṁ jagatyatra dvitīyā kā mamāparā |

पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ५ ॥

paśyaitā duṣṭa mayyeva viśantyo madvibhūtayaḥ ||5||

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।

tataḥ samastāstā devyo brahmāṇīpramukhā layam |

तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ ६ ॥

tasyā devyāstanau jagmurekaivāsīttadāmbikā ||6||

देव्युवाच ॥ ७ ॥

devyuvāca ||7||

अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ।

ahaṁ vibhūtyā bahubhiriha rūpairyadāsthitā |

तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥

tatsaṁhṛtaṁ mayaikaiva tiṣṭhāmyājau sthiro bhava ||8||

ऋषिरुवाच ॥ ९ ॥

ṛṣiruvāca || 9||

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।

tataḥ pravavṛte yuddhaṁ devyāḥ śumbhasya cobhayoḥ |

पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ १० ॥

paśyatāṁ sarvadevānāmasurāṇāṁ ca dāruṇam || 10||

शरवर्षैः शितैः शस्त्रैस्तथा चास्त्रैः सुदारुणैः ।

śaravarṣaiḥ śitaiḥ śastraistathā cāstraiḥ sudāruṇaiḥ |

तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ॥ ११ ॥

tayoryuddhamabhūdbhūyaḥ sarvalokabhayaṅkaram || 11||

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।

divyānyastrāṇi śataśo mumuce yānyathāmbikā |

बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥

babhañja tāni daityendrastatpratīghātakartṛbhiḥ || 12||

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।

muktāni tena cāstrāṇi divyāni parameśvarī |

बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥ १३ ॥

babhañja līlayaivograhuṅkāroccāraṇādibhiḥ || 13||

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
tataḥ śaraśatairdevīmācchādayata so'suraḥ ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४ ॥
sāpi tatkupitā devī dhanuściccheda ceṣubhiḥ ।। 14।।

छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
chinne dhanuṣi daityendrastathā śaktimathādade ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १५ ॥
ciccheda devī cakreṇa tāmapyasya kare sthitām ।। 15।।

ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
tataḥ khaḍgamupādāya śatacandraṁ ca bhānumat ।
अभ्यधा वत तां देवीं दैत्यानामधिपेश्वरः ॥ १६ ॥
abhyadhā vata tāṁ devīṁ daityānāmadhipeśvaraḥ ।। 16।।

तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।
tasyāpatata evāśu khaḍgaṁ ciccheda caṇḍikā ।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ।
dhanurmuktaiḥ śitairbāṇaiścarma cārkakarāmalam ।
अश्वांश्च पातयामास रथं सारथिना सह ॥ १७ ॥
aśvāṁśca pātayāmāsa rathaṁ sārathinā saha ।। 17।।

हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ।

hatāśvaḥ sa tadā daityaśchinnadhanvā visārathiḥ |

जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥ १८ ॥

jagrāha mudgaraṁ ghoramambikānidhanodyataḥ || 18||

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।

cicchedāpatatastasya mudgaraṁ niśitaiḥ śaraiḥ |

तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ १९ ॥

tathāpi so'bhyadhāvattāṁ muṣṭimudyamya vegavān || 19||

स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।

sa muṣṭiṁ pātayāmāsa hṛdaye daityapuṅgavaḥ |

देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ २० ॥

devyāstaṁ cāpi sā devī talenorasyatāḍayat || 20||

तलप्रहाराभिहतो निपपात महीतले ।

talaprahārābhihato nipapāta mahītale |

स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २१ ॥

sa daityarājaḥ sahasā punareva tathotthitaḥ || 21||

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।

utpatya ca pragṛhyoccairdevīṁ gaganamāsthitaḥ |

तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ २२ ॥

tatrāpi sā nirādhārā yuyudhe tena caṇḍikā || 22||

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।

niyuddhaṁ khe tadā daityaścaṇḍikā ca parasparam |

चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥ २३ ॥

cakratuḥ prathamaṁ siddhamunivismayakārakam || 23||

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।

tato niyuddhaṁ suciraṁ kṛtvā tenāmbikā saha |

उत्पाट्य भ्रामयामास चिक्षेप धरणीतले ॥ २४ ॥

utpāṭya bhrāmayāmāsa cikṣepa dharaṇītale || 24||

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगवान् ।

sa kṣipto dharaṇīṁ prāpya muṣṭimudyamya vegavān |

अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥ २५ ॥

abhyadhāvata duṣṭātmā caṇḍikānidhanecchayā || 25||

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।

tamāyāntaṁ tato devī sarvadaityajaneśvaram |

जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २६ ॥

jagatyāṁ pātayāmāsa bhittvā śūlena vakṣasi || 26||

स गतासुः पपातोर्व्यां देवी शूलाग्रविक्षतः ।

sa gatāsuḥ papātorvyāṁ devī śūlāgravikṣataḥ |

चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २७ ॥

cālayan sakalāṁ pṛthvīṁ sābdhidvīpāṁ saparvatām || 27||

ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।
tataḥ prasannamakhilaṁ hate tasmin durātmani |
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥ २८ ॥
jagatsvāsthyamatīvāpa nirmalaṁ cābhavannabhaḥ || 28||

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
utpātameghāḥ solkā ye prāgāsaṁste śamaṁ yayuḥ |
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ २९ ॥
sarito mārgavāhinyastathāsaṁstatra pātite || 29||

ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
tato devagaṇāḥ sarve harṣanirbharamānasāḥ |
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥ ३० ॥
babhūvurnihate tasmin gandharvā lalitaṁ jaguḥ || 30||

अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
avādayaṁstathaivānye nanṛtuścāpsarogaṇāḥ |
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ ३१ ॥
vavuḥ puṇyāstathā vātāḥ suprabho'bhūddivākaraḥ || 31||

जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥ ३२ ॥
jajvaluścāgnayaḥ śāntāḥ śāntā digjanitasvanāḥ || 32||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये शुम्भवधो नाम

devīmāhātmye śumbhavadho nāma

दशमोऽध्यायः ॥ १० ॥

daśamo'dhyāyaḥ || 10||

एकादशोऽध्यायः

ekādaśo'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

देव्या हते तत्र महासुरेन्द्रे

devyā hate tatra mahāsurendre

सेन्द्राः सुरा वह्निपुरोगमास्ताम् ।

sendrāḥ surā vahnipurogamāstām |

कात्यायनीं तुष्टुवुरिष्टलाभाद्

kātyāyanīṁ tuṣṭuvuriṣṭalābhād

विकाशिवक्त्राब्जविकाशिताशाः ॥ २ ॥

vikāśivaktrābjavikāśitāśāḥ || 2||

देवि प्रपन्नार्तिहरे प्रसीद

devi prapannārtihare prasīda

प्रसीद मातर्जगतोऽखिलस्य ।

prasīda mātarjagato'khilasya |

प्रसीद विश्वेश्वरि पाहि विश्वं

prasīda viśveśvari pāhi viśvaṁ

त्वमीश्वरी देवि चराचरस्य ॥ ३ ॥

tvamīśvarī devi carācarasya || 3||

आधारभूता जगतस्त्वमेका

ādhārabhūtā jagatastvamekā

महीस्वरूपेण यतः स्थितासि ।

mahīsvarūpeṇa yataḥ sthitāsi |

अपां स्वरूपस्थितया त्वयैत-

apāṁ svarūpasthitayā tvayaita-

दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥ ४ ॥

dāpyāyate kṛtsnamalaṅghyavīrye || 4||

त्वं वैष्णवीशक्तिरनन्तवीर्या

tvaṁ vaiṣṇavīśaktiranantavīryā

विश्वस्य बीजं परमासि माया ।

viśvasya bījaṁ paramāsi māyā |

सम्मोहितं देवि समस्तमेतत्

sammohitaṁ devi samastametat

त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥

tvaṁ vai prasannā bhuvi muktihetuḥ || 5||

विद्याः समस्तास्तव देवि भेदाः

vidyāḥ samastāstava devi bhedāḥ

स्त्रियः समस्ताः सकला जगत्सु ।

striyaḥ samastāḥ sakalā jagatsu |

त्वयैकया पूरितमम्बयैतत्

tvayaikayā pūritamambayaitat

का ते स्तुतिः स्तव्यपरापरोक्तिः ॥ ६ ॥

kā te stutiḥ stavyaparāparoktiḥ || 6||

सर्वभूता यदा देवी भुक्तिमुक्तिप्रदायिनी ।

sarvabhūtā yadā devī bhuktimuktipradāyinī |

त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७ ॥

tvaṁ stutā stutaye kā vā bhavantu paramoktayaḥ || 7||

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।

sarvasya buddhirūpeṇa janasya hṛdi saṁsthite |

स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ८ ॥

svargāpavargade devi nārāyaṇi namo'stu te || 8||

कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।

kalākāṣṭhādirūpeṇa pariṇāmapradāyini |

विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ९ ॥

viśvasyoparatau śakte nārāyaṇi namo'stu te || 9||

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।

sarvamaṅgalamāṅgalye śive sarvārthasādhike |

शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ १० ॥

śaraṇye tryambake gauri nārāyaṇi namo'stu te || 10||

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।

sṛṣṭisthitivināśānāṁ śaktibhūte sanātani |

गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ ११ ॥

guṇāśraye guṇamaye nārāyaṇi namo'stu te || 11||

शरणागतदीनार्तपरित्राणपरायणे ।

śaraṇāgatadīnārtaparitrāṇaparāyaṇe |

सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ १२ ॥

sarvasyārtihare devi nārāyaṇi namo'stu te || 12||

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।

haṁsayuktavimānasthe brahmāṇīrūpadhāriṇi |

कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥ १३ ॥

kauśāmbhaḥkṣarike devi nārāyaṇi namo'stu te || 13||

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।

triśūlacandrāhidhare mahāvṛṣabhavāhini |

माहेश्वरीस्वरूपेण नारायणि नमोऽस्तुते ॥ १४ ॥

māheśvarīsvarūpeṇa nārāyaṇi namo'stute || 14||

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।

mayūrakukkuṭavṛte mahāśaktidhare'naghe |

कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥ १५ ॥

kaumārīrūpasaṁsthāne nārāyaṇi namo'stu te || 15||

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ।

śaṅkhacakragadāśārṅgagṛhītaparamāyudhe |

प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥ १६ ॥

prasīda vaiṣṇavīrūpe nārāyaṇi namo'stu te || 16||

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।

gṛhītogramahācakre daṁṣṭroddhṛtavasundhare |

वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥ १७ ॥

varāharūpiṇi śive nārāyaṇi namo'stu te || 17||

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।

nṛsiṁharūpeṇogreṇa hantuṁ daityān kṛtodyame |

त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥ १८ ॥

trailokyatrāṇasahite nārāyaṇi namo'stu te || 18||

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।

kirīṭini mahāvajre sahasranayanojjvale |

वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥ १९ ॥

vṛtraprāṇahare caindri nārāyaṇi namo'stu te || 19||

शिवदूतीस्वरूपेण हतदैत्यमहाबले ।

śivadūtīsvarūpeṇa hatadaityamahābale ।

घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ २० ॥

ghorarūpe mahārāve nārāyaṇi namo'stu te ।। 20।।

दंष्ट्राकरालवदने शिरोमालाविभूषणे ।

daṁṣṭrākarālavadane śiromālāvibhūṣaṇe ।

चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ २१ ॥

cāmuṇḍe muṇḍamathane nārāyaṇi namo'stu te ।। 21।।

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।

lakṣmi lajje mahāvidye śraddhe puṣṭi svadhe dhruve ।

महारात्रि महामाये नारायणि नमोऽस्तु ते ॥ २२ ॥

mahārātri mahāmāye nārāyaṇi namo'stu te ।। 22।।

मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।

medhe sarasvati vare bhūti bābhravi tāmasi ।

नियते त्वं प्रसीदेशे नारायणि नमोऽस्तुते ॥ २३ ॥

niyate tvaṁ prasīdeśe nārāyaṇi namo'stute ।। 23।।

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।

sarvasvarūpe sarveśe sarvaśaktisamanvite ।

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २४ ॥

bhayebhyastrāhi no devi durge devi namo'stu te ।। 24।।

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।

etatte vadanaṁ saumyaṁ locanatrayabhūṣitam |

पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते ॥ २५ ॥

pātu naḥ sarvabhūtebhyaḥ kātyāyani namo'stu te || 25||

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।

jvālākarālamatyugramaśeṣāsurasūdanam |

त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ २६ ॥

triśūlaṁ pātu no bhīterbhadrakāli namo'stu te || 26||

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।

hinasti daityatejāṁsi svanenāpūrya yā jagat |

सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७ ॥

sā ghaṇṭā pātu no devi pāpebhyo naḥ sutāniva || 27||

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।

asurāsṛgvasāpaṅkacarcitaste karojjvalaḥ |

शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ २८ ॥

śubhāya khaḍgo bhavatu caṇḍike tvāṁ natā vayam || 28||

रोगानशेषानपहंसि तुष्टा

rogānaśeṣānapahaṁsi tuṣṭā

रुष्टा तु कामान् सकलानभीष्टान् ।

ruṣṭā tu kāmān sakalānabhīṣṭān |

त्वामाश्रितानां न विपन्नराणां

tvāmāśritānāṁ na vipannarāṇāṁ

त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ २९ ॥

tvāmāśritā hyāśrayatāṁ prayānti || 29||

एतत्कृतं यत्कदनं त्वयाद्य

etatkṛtaṁ yatkadanaṁ tvayādya

धर्मद्विषां देवि महासुराणाम् ।

dharmadviṣāṁ devi mahāsurāṇām |

रूपैरनेकैर्बहुधात्ममूर्तिं

rūpairanekairbahudhātmamūrtiṁ

कृत्वाम्बिके तत्प्रकरोति कान्या ॥ ३० ॥

kṛtvāmbike tatprakaroti kānyā || 30||

विद्यासु शास्त्रेषु विवेकदीपे-

vidyāsu śāstreṣu vivekadīpe-

ष्वाद्येषु वाक्येषु च का त्वदन्या ।

ṣvādyeṣu vākyeṣu ca kā tvadanyā |

ममत्वगर्तेऽतिमहान्धकारे

mamatvagarte'timahāndhakāre

विभ्रामयत्येतदतीव विश्वम् ॥ ३१ ॥

vibhrāmayatyetadatīva viśvam || 31||

रक्षांसि यत्रोग्रविषाश्च नागा

rakṣāṁsi yatrogravişāśca nāgā

यत्रारयो दस्युबलानि यत्र ।

yatrārayo dasyubalāni yatra |

दावानलो यत्र तथाब्धिमध्ये

dāvānalo yatra tathābdhimadhye

तत्र स्थिता त्वं परिपासि विश्वम् ॥ ३२ ॥

tatra sthitā tvaṁ paripāsi viśvam || 32||

विश्वेश्वरि त्वं परिपासि विश्वं

viśveśvari tvaṁ paripāsi viśvaṁ

विश्वात्मिका धारयसीह विश्वम् ।

viśvātmikā dhārayasīha viśvam |

विश्वेशवन्द्या भवती भवन्ति

viśveśavandyā bhavatī bhavanti

विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३३ ॥

viśvāśrayā ye tvayi bhaktinamrāḥ || 33||

देवि प्रसीद परिपालय नोऽरिभीते-

devi prasīda paripālaya no'ribhīte-

र्नित्यं यथासुरवधादधुनैव सद्यः ।

rnityaṁ yathāsuravadhādadhunaiva sadyaḥ |

पापानि सर्वजगतां प्रशमं नयाशु

pāpāni sarvajagatāṁ praśamaṁ nayāśu

उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥

utpātapākajanitāṁśca mahopasargān || 34||

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।

praṇatānāṁ prasīda tvaṁ devi viśvārtihāriṇi |

त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥

trailokyavāsināmīḍye lokānāṁ varadā bhava || 35||

देव्युवाच ॥ ३६ ॥

devyuvāca || 36||

वरदाहं सुरगणा वरं यन्मनसेच्छथ ।

varadāhaṁ suragaṇā varaṁ yanmanasecchatha |

तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ ३७ ॥

taṁ vṛṇudhvaṁ prayacchāmi jagatāmupakārakam || 37||

देवा ऊचुः ॥ ३८ ॥

devā ūcuḥ || 38||

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।

sarvābādhāpraśamanaṁ trailokyasyākhileśvari |

एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ३९ ॥

evameva tvayā kāryamasmadvairivināśanam || 39||

देव्युवाच ॥ ४० ॥

devyuvāca || 40||

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।

vaivasvate'ntare prāpte aṣṭāviṁśatime yuge |

शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥

śumbho niśumbhaścaivānyāvutpatsyete mahāsurau || 41||

नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।

nandagopagr̥he jātā yaśodāgarbhasambhavā |

ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ४२ ॥

tatastau nāśayiṣyāmi vindhyācalanivāsinī || 42||

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।

punarapyatiraudreṇa rūpeṇa pr̥thivītale |

अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४३ ॥

avatīrya haniṣyāmi vaipracittāṁśca dānavān || 43||

भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।

bhakṣayantyāśca tānugrān vaipracittān mahāsurān |

रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ ४४ ॥

raktā dantā bhaviṣyanti dāḍimīkusumopamāḥ || 44||

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।

tato māṁ devatāḥ svarge martyaloke ca mānavāḥ ।

स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥ ४५ ॥

stuvanto vyāhariṣyanti satataṁ raktadantikām ।। 45।।

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।

bhūyaśca śatavārṣikyāmanāvṛṣṭyāmanambhasi ।

मुनिभिः संस्मृता भूमौ सम्भविष्याम्ययोनिजा ॥ ४६ ॥

munibhiḥ saṁsmṛtā bhūmau sambhaviṣyāmyayonijā ।। 46।।

ततः शतेन नेत्राणां निरीक्षिष्याम्यहं मुनीन् ।

tataḥ śatena netrāṇāṁ nirīkṣiṣyāmyahaṁ munīn ।

कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥ ४७ ॥

kīrtayiṣyanti manujāḥ śatākṣīmiti māṁ tataḥ ।। 47।।

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।

tato'hamakhilaṁ lokamātmadehasamudbhavaiḥ ।

भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४८ ॥

bhariṣyāmi surāḥ śākairāvṛṣṭeḥ prāṇadhārakaiḥ ।। 48।।

शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।

śākambharīti vikhyātiṁ tadā yāsyāmyahaṁ bhuvi ।

तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥ ४९ ॥

tatraiva ca vadhiṣyāmi durgamākhyaṁ mahāsuram ।। 49।।

दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ।

durgādevīti vikhyātaṁ tanme nāma bhaviṣyati ।

पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ ५० ॥

punaścāhaṁ yadā bhīmaṁ rūpaṁ kṛtvā himācale ।। 50।।

रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ।

rakṣāṁsi bhakṣayiṣyāmi munīnāṁ trāṇakāraṇāt ।

तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥ ५१ ॥

tadā māṁ munayaḥ sarve stoṣyantyānamramūrtayaḥ ।। 51।।

भीमादेवीति विख्यातं तन्मे नाम भविष्यति ।

bhīmādevīti vikhyātaṁ tanme nāma bhaviṣyati ।

यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ ५२ ॥

yadāruṇākhyastrailokye mahābādhāṁ kariṣyati ।। 52।।

तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम् ।

tadāhaṁ bhrāmaraṁ rūpaṁ kṛtvāsaṅkhyeyaṣaṭpadam ।

त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ ५३ ॥

trailokyasya hitārthāya vadhiṣyāmi mahāsuram ।। 53।।

भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ।

bhrāmarīti ca māṁ lokāstadā stoṣyanti sarvataḥ ।

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५४ ॥

itthaṁ yadā yadā bādhā dānavotthā bhaviṣyati ।। 54।।

तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५५ ॥

tadā tadāvatīryāhaṁ kariṣyāmyarisaṅkṣayam || 55||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike

मन्वन्तरे देवीमाहात्म्ये

manvantare devīmāhātmye

नारायणीस्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥

nārāyaṇīstutirnāmaikādaśo'dhyāyaḥ || 11||

द्वादशोऽध्यायः

dvādaśo'dhyāyaḥ

ॐ देव्युवाच ॥ १ ॥

om devyuvāca || 1||

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।

ebhiḥ stavaiśca māṁ nityaṁ stoṣyate yaḥ samāhitaḥ |

तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् ॥ २ ॥

tasyāhaṁ sakalāṁ bādhāṁ śamayiṣyāmyasaṁśayam || 2||

मधुकैटभनाशं च महिषासुरघातनम् ।

madhukaiṭabhanāśaṁ ca mahiṣāsuraghātanam |

कीर्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥ ३ ॥

kīrtayiṣyanti ye tadvadvadhaṁ śumbhaniśumbhayoḥ || 3||

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ।

aṣṭamyāṁ ca caturdaśyāṁ navamyāṁ caikacetasaḥ |

श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥

śroṣyanti caiva ye bhaktyā mama māhātmyamuttamam || 4||

न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ।

na teṣāṁ duṣkṛtaṁ kiñcidduṣkṛtotthā na cāpadaḥ ǀ

भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥

bhaviṣyati na dāridryaṁ na caiveṣṭaviyojanam ǀǀ 5ǀǀ

शत्रुभ्यो न भयं तस्य दस्युतो वा न राजतः ।

śatrubhyo na bhayaṁ tasya dasyuto vā na rājataḥ ǀ

न शस्त्रानलतोयौघात् कदाचित् सम्भविष्यति ॥ ६ ॥

na śastrānalatoyaughāt kadācit sambhaviṣyati ǀǀ 6ǀǀ

तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ।

tasmānmamaitanmāhātmyaṁ paṭhitavyaṁ samāhitaiḥ ǀ

श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ ७ ॥

śrotavyaṁ ca sadā bhaktyā paraṁ svastyayanaṁ mahat ǀǀ 7ǀǀ

उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।

upasargānaśeṣāṁstu mahāmārīsamudbhavān ǀ

तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥

tathā trividhamutpātaṁ māhātmyaṁ śamayenmama ǀǀ 8ǀǀ

यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ।

yatraitatpaṭhyate samyaṅnityamāyatane mama ǀ

सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ॥ ९ ॥

sadā na tadvimokṣyāmi sānnidhyaṁ tatra me sthitam ǀǀ 9ǀǀ

बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।

balipradāne pūjāyāmagnikārye mahotsave |

सर्वं ममैतन्माहात्म्यम् उच्चार्यं श्राव्यमेव च ॥ १० ॥

sarvaṁ mamaitanmāhātmyam uccāryaṁ śrāvyameva ca || 10||

जानताजानता वापि बलिपूजां यथा कृताम् ।

jānatājānatā vāpi balipūjāṁ yathā kṛtām |

प्रतीक्षिष्याम्यहं प्रीत्या वह्निहोमं तथाकृतम् ॥ ११ ॥

pratīkṣiṣyāmyahaṁ prītyā vahnihomaṁ tathākṛtam || 11||

शरत्काले महापूजा क्रियते या च वार्षिकी ।

śaratkāle mahāpūjā kriyate yā ca vārṣikī |

तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ १२ ॥

tasyāṁ mamaitanmāhātmyaṁ śrutvā bhaktisamanvitaḥ || 12||

सर्वाबाधाविनिर्मुक्तो धनधान्यसमन्वितः ।

sarvābādhāvinirmukto dhanadhānyasamanvitaḥ |

मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३ ॥

manuṣyo matprasādena bhaviṣyati na saṁśayaḥ || 13||

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।

śrutvā mamaitanmāhātmyaṁ tathā cotpattayaḥ śubhāḥ |

पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥

parākramaṁ ca yuddheṣu jāyate nirbhayaḥ pumān || 14||

रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ।

ripavaḥ saṅkṣayaṁ yānti kalyāṇaṁ copapadyate |

नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५ ॥

nandate ca kulaṁ puṁsāṁ māhātmyaṁ mama śṛṇvatām || 15||

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।

śāntikarmaṇi sarvatra tathā duḥsvapnadarśane |

ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥

grahapīḍāsu cogrāsu māhātmyaṁ śṛṇuyānmama || 16||

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।

upasargāḥ śamaṁ yānti grahapīḍāśca dāruṇāḥ |

दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥

duḥsvapnaṁ ca nṛbhirdṛṣṭaṁ susvapnamupajāyate || 17||

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।

bālagrahābhibhūtānāṁ bālānāṁ śāntikārakam |

संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥

saṅghātabhede ca nṛṇāṁ maitrīkaraṇamuttamam || 18||

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।

durvṛttānāmaśeṣāṇāṁ balahānikaraṁ param |

रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १९ ॥

rakṣobhūtapiśācānāṁ paṭhanādeva nāśanam || 19||

सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ।

sarvaṁ mamaitanmāhātmyaṁ mama sannidhikārakam |

पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ॥ २० ॥

paśupuṣpārghyadhūpaiśca gandhadīpaistathottamaiḥ || 20||

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ।

viprāṇāṁ bhojanairhomaiḥ prokṣaṇīyairaharniśam |

अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २१ ॥

anyaiśca vividhairbhogaiḥ pradānairvatsareṇa yā || 21||

प्रीतिर्मे क्रियते सास्मिन् सकृदुच्चरिते श्रुते ।

prītirme kriyate sāsmin sakṛduccarite śrute |

श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २२ ॥

śrutaṁ harati pāpāni tathārogyaṁ prayacchati || 22||

रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ।

rakṣāṁ karoti bhūtebhyo janmanāṁ kīrtanaṁ mama |

युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २३ ॥

yuddheṣu caritaṁ yanme duṣṭadaityanibarhaṇam || 23||

तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ।

tasmiñchrute vairikṛtaṁ bhayaṁ puṁsāṁ na jāyate |

युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ २४ ॥

yuṣmābhiḥ stutayo yāśca yāśca brahmarṣibhiḥ kṛtāḥ || 24||

ब्रह्मणा च कृतास्तास्तु प्रयच्छन्तु शुभां मतिम् ।

brahmaṇā ca kṛtāstāstu prayacchantu śubhāṁ matim |

अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥ २५ ॥

araṇye prāntare vāpi dāvāgniparivāritaḥ || 25||

दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ।

dasyubhirvā vṛtaḥ śūnye gṛhīto vāpi śatrubhiḥ |

सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ २६ ॥

siṁhavyāghrānuyāto vā vane vā vanahastibhiḥ || 26||

राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ।

rājñā kruddhena cājñapto vadhyo bandhagato'pi vā |

आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७ ॥

āghūrṇito vā vātena sthitaḥ pote mahārṇave || 27||

पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ।

patatsu cāpi śastreṣu saṅgrāme bhṛśadāruṇe |

सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २८ ॥

sarvābādhāsu ghorāsu vedanābhyardito'pi vā || 28||

स्मरन् ममैतच्चरितं नरो मुच्येत सङ्कटात् ।

smaran mamaitaccaritaṁ naro mucyeta saṅkaṭāt |

मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९ ॥

mama prabhāvātsiṁhādyā dasyavo vairiṇastathā || 29||

दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ ३० ॥

dūrādeva palāyante smarataścaritaṁ mama || 30||

ऋषिरुवाच ॥ ३१ ॥

ṛṣiruvāca || 31||

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ ३२ ॥

ityuktvā sā bhagavatī caṇḍikā caṇḍavikramā || 32||

पश्यतां सर्वदेवानां तत्रैवान्तरधीयत ।

paśyatāṁ sarvadevānāṁ tatraivāntaradhīyata |

तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ॥ ३३ ॥

te'pi devā nirātaṅkāḥ svādhikārānyathā purā || 33||

यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ।

yajñabhāgabhujaḥ sarve cakrurvinihatārayaḥ |

दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥ ३४ ॥

daityāśca devyā nihate śumbhe devaripau yudhi || 34||

जगद्विध्वंसके तस्मिन् महोग्रेऽतुलविक्रमे ।

jagadvidhvaṁsake tasmin mahogre'tulavikrame |

निशुम्भे च महावीर्ये शेषाः पातालमाययुः ॥ ३५ ॥

niśumbhe ca mahāvīrye śeṣāḥ pātālamāyayuḥ || 35||

एवं भगवती देवी सा नित्यापि पुनः पुनः ।

evaṁ bhagavatī devī sā nityāpi punaḥ punaḥ |

सम्भूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥

sambhūya kurute bhūpa jagataḥ paripālanam || 36||

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ।

tayaitanmohyate viśvaṁ saiva viśvaṁ prasūyate |

सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥

sā yācitā ca vijñānaṁ tuṣṭā ṛddhiṁ prayacchati || 37||

व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ।

vyāptaṁ tayaitatsakalaṁ brahmāṇḍaṁ manujeśvara |

महादेव्या महाकाली महामारीस्वरूपया ॥ ३८ ॥

mahādevyā mahākālī mahāmārīsvarūpayā || 38||

सैव काले महामारी सैव सृष्टिर्भवत्यजा ।

saiva kāle mahāmārī saiva sṛṣṭirbhavatyajā |

स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥

sthitiṁ karoti bhūtānāṁ saiva kāle sanātanī || 39||

भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ।

bhavakāle nṛṇāṁ saiva lakṣmīrvṛddhipradā gṛhe |

सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥ ४० ॥

saivābhāve tathālakṣmīrvināśāyopajāyate || 40||

स्तुता सम्पूजिता पुष्पैर्गन्धधूपादिभिस्तथा ।

stutā sampūjitā puṣpairgandhadhūpādibhistathā |

ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥ ४१ ॥

dadāti vittaṁ putrāṁśca matiṁ dharme gatiṁ śubhām || 41||

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये भगवती वाक्यं

devīmāhātmye bhagavatī vākyaṁ

द्वादशोऽध्यायः ॥ १२ ॥

dvādaśo'dhyāyaḥ || 12||

त्रयोदशोऽध्यायः

trayodaśo'dhyāyaḥ

ॐ ऋषिरुवाच ॥ १ ॥

om ṛṣiruvāca || 1||

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ।

etatte kathitaṁ bhūpa devīmāhātmyamuttamam |

एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥ २ ॥

evamprabhāvā sā devī yayedaṁ dhāryate jagat || 2||

विद्या तथैव क्रियते भगवद्विष्णुमायया ।

vidyā tathaiva kriyate bhagavadviṣṇumāyayā |

तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ ३ ॥

tayā tvameṣa vaiśyaśca tathaivānye vivekinaḥ || 3||

मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ।

mohyante mohitāścaiva mohameṣyanti cāpare |

तामुपैहि महाराज शरणं परमेश्वरीम् ॥ ४ ॥

tāmupaihi mahārāja śaraṇaṁ parameśvarīm || 4||

आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ५ ॥

ārādhitā saiva nṛṇāṁ bhogasvargāpavargadā || 5||

मार्कण्डेय उवाच ॥ ६ ॥

mārkaṇḍeya uvāca || 6||

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ ७ ॥

iti tasya vacaḥ śrutvā surathaḥ sa narādhipaḥ || 7||

प्रणिपत्य महाभागं तमृषिं संशितव्रतम् ।

praṇipatya mahābhāgaṁ tamṛṣiṁ saṁśitavratam |

निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥ ८ ॥

nirviṇṇo'timamatvena rājyāpaharaṇena ca || 8||

जगाम सद्यस्तपसे स च वैश्यो महामुने ।

jagāma sadyastapase sa ca vaiśyo mahāmune |

संदर्शनार्थमम्बाया नदीपुलिनमास्थितः ॥ ९ ॥

sandarśanārthamambāyā nadīpulinamāsthitaḥ || 9||

स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ।

sa ca vaiśyastapastepe devīsūktaṁ paraṁ japan |

तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ १० ॥

tau tasmin puline devyāḥ kṛtvā mūrtiṁ mahīmayīm || 10||

अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ।

arhaṇāṁ cakratustasyāḥ puṣpadhūpāgnitarpaṇaiḥ |

निराहारौ यतात्मानौ तन्मनस्कौ समाहितौ ॥ ११ ॥

nirāhārau yatātmānau tanmanaskau samāhitau || 11||

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ।

dadatustau baliṁ caiva nijagātrāsṛgukṣitam |

एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥

evaṁ samārādhayatostribhirvarṣairyatātmanoḥ || 12||

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ १३ ॥

parituṣṭā jagaddhātrī pratyakṣaṁ prāha caṇḍikā || 13||

देव्युवाच ॥ १४ ॥

devyuvāca || 14||

यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ।

yatprārthyate tvayā bhūpa tvayā ca kulanandana |

मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामिते ॥ १५ ॥

mattastatprāpyatāṁ sarvaṁ parituṣṭā dadāmite || 15||

मार्कण्डेय उवाच ॥ १६ ॥

mārkaṇḍeya uvāca || 16||

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ।

tato vavre nṛpo rājyamavibhraṁśyanyajanmani |

अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ १७ ॥

atraiva ca nijaṁ rājyaṁ hataśatrubalaṁ balāt || 17||

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।

so'pi vaiśyastato jñānaṁ vavre nirviṇṇamānasaḥ |

ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥ १८ ॥

mametyahamiti prājñaḥ saṅgavicyutikārakam || 18||

देव्युवाच ॥ १९ ॥

devyuvāca || 19||

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ २० ॥

svalpairahobhirnṛpate svaṁ rājyaṁ prāpsyate bhavān || 20||

हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥ २१ ॥

hatvā ripūnaskhalitaṁ tava tatra bhaviṣyati || 21||

मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः ॥ २२ ॥

mṛtaśca bhūyaḥ samprāpya janma devādvivasvataḥ || 22||

सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥ २३ ॥

sāvarṇiko manurnāma bhavānbhuvi bhaviṣyati || 23||

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥ २४ ॥

vaiśyavarya tvayā yaśca varo'smatto'bhivāñchitaḥ || 24||

तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५ ॥

taṁ prayacchāmi saṁsiddhyai tava jñānaṁ bhaviṣyati || 25||

मार्कण्डेय उवाच ॥ २६ ॥

mārkaṇḍeya uvāca || 26||

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ।

iti dattvā tayordevī yathābhilaṣitaṁ varam |

बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ २७ ॥

babhūvāntarhitā sadyo bhaktyā tābhyāmabhiṣṭutā || 27||

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।

evaṁ devyā varaṁ labdhvā surathaḥ kṣatriyarṣabhaḥ |

सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २८ ॥

sūryājjanma samāsādya sāvarṇirbhavitā manuḥ || 28||

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ।

iti dattvā tayordevī yathābhilaṣitaṁ varam |

बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥

babhūvāntarhitā sadyo bhaktyā tābhyāmabhiṣṭutā ||

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।

evaṁ devyā varaṁ labdhvā surathaḥ kṣatriyarṣabhaḥ |

सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

sūryājjanma samāsādya sāvarṇirbhavitā manuḥ ||

। क्लीं ॐ ।

| klīm om |

॥ स्वस्ति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे

|| svasti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare

देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम

devīmāhātmye surathavaiśyayorvarapradānaṁ nāma

त्रयोदशोऽध्यायः ॥ १३ ॥

trayodaśo'dhyāyaḥ || 13||

॥ श्रीसप्तशतीदेवीमाहात्म्यं समाप्तम् ॥

|| śrīsaptaśatīdevīmāhātmyaṁ samāptam ||

॥ ॐ तत् सत् ॐ ॥

|| om tat sat om ||